- Title – श्री दुर्गा सप्तशती – रघुनाथ टीका
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 51/102
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशाय नमः, नमश्चण्डिकायै नमः श्रोके हृत बध्वामवाम्नवि –
- End – त्वदन्या कात्व मेव सर्वत्र विधा –
- Colophon-
- Illustrations -
- Source -
- Subject - कर्मकाण्ड
- Revisor -
- Author - श्री गंगा द्विवेदी
- Remarks- पृष्ठ – 1–51 तक है – अपूर्ण

अंकित

दु. १०

॥श्रीगणेशायनमः॥ ॐनमश्चण्डिकायैनमः॥ श्रीकेहंतवधामवामनविमोघध्यानमवेहि॥कथंकिं
वातत्रनवैवशक्तिरपरासंसूचितेनत्वया साकिंतेनमवेहिनीपधरणीसंपादनेवाक्षमात्त (1)
स्माद्याचनवंचनानवविमोघत्येषुनैवोचिता १ एतत्समीक्ष्यपुरातनप्रयुक्ताःसुचिरंचेतसि
योजनाःस्वबुध्या मुजनस्यसुखावपसप्तशत्यारघुनाथशर्मनामात्नोतितिटीकां २ अथवध्यःगा
धेरघुनाथनाम्नाव्याख्यानरूपःस्वधियैवसेतुः अखंडितसप्तशतीसमुद्रे गतागतेसाधुजनस्य
नीतः॥३॥ तद्देशितोविशेषेणपतितरंतेनिवासिनः कौतुकात्कुरुतेटीकांमुदेगंगाह्विवेदितः
४ पूर्वंकिलभगवद्बादरायणशिष्योजैमिनिर्महाभारतविषयेषुकेषुचिदार्थेषुसंदिह्य
नोमार्कंडेयंमहामुनिमुपगम्योक्तवान्हेमुनेमदीयान्संदेहानपाकुर्विति तदनंतरमार्कंडे
येनोक्तंममध्यानासक्तस्यत्वदीयसंदेहनिराकरणेऽवकाशोनास्तित्वमिमान्सर्वथामितःविं
ध्याचलवासिनश्चतुरःपक्षिणःपृच्छेति तदनंतरंजैमिनिस्तथैवकृतवान्पुनश्चजैमिनिप्रश्ना
नोरोधात्सर्गादिपुराणलक्षणव्याख्यावसरेनुरायपुराणलक्षणव्याविख्यासथामार्कंडेयभागुरिसंवादा
त्मकमितिहासमनुवर्णयंतोऽष्टमममन्वंतरमपक्रममाणाधर्मपक्षिणऊचुर्मार्कंडेयनुवा

१

पु०सं०

२

दु.टी. दनेन गदघ नर्थकः तदं मान्नस्य ॥१॥ महामायेति। विसदृशज्ञानापसाधनं माया तस्याश्च महत्त्वं 3
२ सर्वविषयत्वमिति महामायेश्वरशक्तिः सैव प्राणिनो मोहयति अथवा महती माया शांबरी
यस्याः यया माया यमहिषासुरप्रभृतयो मायाविनो हताः अथवा महती माया बुद्धिर्यस्याः य
या बुद्ध्या त्रैलोक्यरक्षणं भवति। माया स्यात् शांबरी बुद्धौ रिति मेदिनीकारः। तस्याः अनुभावो
नेदमस्य मुवादित्यनुक्तेरहं छया। यथाने तप्रकारेण मन्वन्तरं किंचिदधिकैकसप्ततिचतुर्यु
गात्मकः कालः तस्याधिपो राजा बभूवेति भाविनि भूतवदुपचारः तं प्रकारं तिशृणु येन नुषं
गः। यन्नदोसाद्दृचयेनियमात्। महानसाधारणो भागो महासमुदायो यस्याः सच देश्वर्यस्य स
मग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगना इति विष्णुपुराणोक्तः।
रवेस्तनयः सावर्णिरिति संज्ञमेलापुनरुक्तिः ॥२॥ अष्टमेति लासमवतारयति। स्वारोचिषेंतर इति
॥स्वरोचिषोऽपत्यं स्वारोचिष इति। स्वारोचिषो नाम द्वितीयो मनुस्तदधिकारोपलक्षिते स्वारोचि
षेंऽतरे समये द्वितीयमन्वंतर इति यावत्। मन्वंतरं मनोः काल इति विष्णुपुराणदर्शनात्। पूर्वंक
थाकालापेक्षया। चैत्रो नाम स्वारोचिषस्य मनोः सूनुः तस्य वंशे संततौ समुद्भवो जन्म यस्य तं
२

चेति। मृकंडोरपत्यं मार्कंडेयः। मंगलार्थं ध्यायं चिरजीविनो मार्कंडेयस्य ग्रंथादावुपन्यासः। अस्य
छंद ऋषिकरणं। सप्तशतीदेवीस्तकस्य मार्कंडेय ऋषिः अनुष्टोऽतिजगत्यः पुनरनुष्टुप्त्रिष्टु
प्छंदांसि। दुर्गादेवी देवतानामुवने शीवीजं रमाशक्तिः संकल्पितार्थसिद्धये विनियोगः॥ ॥सा
वर्णिरिति॥ सवर्णा छायापत्न्याः अपत्यं सावर्णिः यस्कादित्वाद्दिस्ल। यद्वा अग्रजस्य वैवस्वतमनोः
समानो वर्णोऽस्येति सवर्णः सवर्ण एव सावर्णिः। स्वार्थे तद्धिताभिधानात्। तथा च विष्णुपुराणे छा
यासंज्ञासुतो यो सौ द्वितीयः कथितो मनुः। पूर्वजस्य सवर्णोसौ सावर्णिस्तेन कथ्यते। सूर्यतनय ५
इति दक्षसावर्ण्यादीनां व्युदासार्थं। यः सावर्णिरष्टमो मनुः॥४॥ स्तरथः कथ्यते तदुत्पत्तिं निशा
मयजानीहीत्यर्थः। निशामयेति शम लक्षणे आलोचने इत्यस्य चौरादिकस्य रूपं। शमो अदर्शन
इति दर्शनाविषयसानुबंध संज्ञाविधानात् ह्रस्वत्वभावो। तदुत्पत्तिमिति वाच्यवाचकभेदाभिप्राये
ण विस्तरात्सप्तपंचनः। गदतः कथयतः। ममेति। अपवादविषयेक्कचिदस्मदित्यस्यापि ममादे
शविधानात्पंचम्यर्थे षष्ठी। अव्ययं वा पंचम्यंतं। यद्वा मम विस्तरात् ममशब्दप्रपंचात्। विस्तारो
विग्रहे व्यासे सच शब्दस्य विस्तर इत्यभिधानात्। अन्येतु मम गदतो मम वचनात् इत्याहुः। ग

मेतिप्रसिद्धो सुरथसंज्ञया प्रसिद्ध इत्यर्थः ॥३॥ धर्म्म्यपत्नीपभवान् प्रजानिवनीतिशास्त्रानुशा
रेण प्रजाः पालयतस्य शत्रवस्तथा तादृशास्तत्सुद्रिका बभूवुः। के ते इत्यपेक्षायामाह। कोला
विध्वंसिनो भूपा इति। कोला इत्यस्य कराः इति विध्वंसंतितेकोलाविध्वंसिनो यवनाः ब्रूरनामी द्वा
यो म्लेच्छ इति एणाति:। कोलेति सुरथस्यैव राजधान्यंतरं तो विध्वंसिनो यथा तथा व भूवुरित्यर्थः।
कोलेत्यन्येषामेव काचिद्राजधानी तद्विध्वंसिनस्तन्निवासिनः। उपसर्गेण धात्वर्थस्यान्यथा
करणात्। कोलेति पाशास्त्रविशेषो वा तेन विध्वंसितुं शीलं येषामिति वा तदेषि पाठे तस्मिन्
काले इत्यर्थः प्रबलः इति शापितो दंडो हस्त्यस्वादिसमूहः अथवा धर्म्मशास्त्रानुशारी प्रजासुदं
डो विधते यस्य तस्य सुरथः स्यतैः कोलाविध्वंसिभिः सह युद्धं संप्रहारो ऽभवत्। न्यूनैरप्यस्य सामग्री
केरपि तैः स सुरथो जितः जयभंगयोर्दैवाधीनत्वात् ॥५॥ ततो तं नरं स्वराजधानीमायातो भूतरा
ष्ट्राध्यक्षो भवत्। कथंभूतः तस्मिन् काले प्राप्तबलेरिरिभि राक्रांतो ऽभिभूतः छिन्नदेशो वा
॥६॥ सा[illegible]र्ववि भक्ति कृतसि स्वं गीकारेतत इति बलात् तं तस्य तत्र स्वपुरेपि द्युमात्यैः सहमंत्रैः।
संजातबलैः दुष्टैः रागद्वेषादियुक्तै दुरात्मभिः स्वामिद्रोहादिमहापातकशालितयानिंदितो तैः

दु.श०
२

करस्तैस्तैर्भाग्यवद्भिर्नतः करस्यैः कोशात्रुभिः अपि तत्र तत्स्वार्थः संचयः सैन्यं चापहृतं तत्र तद्‌इति पं
चम्यां तं वा महाशत्रुकृतता दृष्ट्वा मि भवानं तरं स यं स्वामग्वलोऽस्माकं किं करिष्यतीति संचिन्त्य 6
त्वो भाग्युपहृतां ततः करस्यैः सर्वं कोशादिकमपहृतमित्यर्थः ॥८॥ मृगयाव्याजेन मृगदर्शन
छलेन हृतं स्वाम्यमाधिपत्यं यस्य सोऽसहाय एकाकी दुर्गं वनं जगाम ।९॥ तत्र वने स राजा मेधोऽभिधा
नस्य ब्राह्मणश्रेष्ठस्याश्रमं मुनिनिवासोचितं स्थानमद्राक्षीत् । प्रकर्षेण शांतैर्मुनिप्रभावात्
परहिंसारहितैः श्वापदैर्हिंस्रपशुभिर्व्याघ्रादिभिराकीर्णं व्याप्तं मुनेर्मेधसः शिष्यैरुपशोभि
तं मननशीलैर्वा शिष्यैर्मुनिभिः शिष्यैर्वा ॥९॥ कंचित्कालमित्यत्यंतसंयोगे द्वितीया ॥ स
चेति चकारान्वयः तेन मुनिना सत्कृतः पूजितः इतश्चेतश्चानियतदिग्देशं । मुनिवरेति भागुरेः ॥
संबोधनं मेधसो विशेषणं वा ॥१०॥ ममेति षष्ठ्यन्तं प्रतिरूपकमव्ययं तस्य भावि ममत्वं भवेत्यभि
मानस्तेनाकृष्टा वशीकृता चेतना बुद्धिर्यस्य तदा स राजा तत्राश्रमेऽचिंतयत् ततो ममत्वाकृष्ट
चेतन इत्यन्वयः ॥ चिंतामेवाह ॥ मत्पूर्वैरित्यादिना । मदीयप्राचीनपुरुषैः पूर्वं प्राक्पालितं यत
संयोगे द्वितीया ॥१॥ सि[म्र]तोरत्तिदुःतुगर्भं विशेषणं । अत एव धर्मतः उचितनीत्या पालित्य ३

तेन वेति विकल्पः। सप्रसिद्धप्रधानो मुख्यः। उक्तलिंगं त्यजं त्यपातिन्यामुंस्त्वं। तथा वलं काको
डे। ये प्रधानाः पुरंगमा इति। यद्वा सप्रधानो महामात्र सचिवः।१२। मम शत्रुपारते यं शत्रुका
शंकिपत्तः कीदृशान्वा भोगानुपलेक्ष्यते इति न जान इति पूर्वेणान्वयः। प्रसाद स्तुष्टिदानं धनं
वर्षदेयदातं भोजनं प्रतिदिनदेयं। यद्वा प्रसादोऽनुग्रहो धनं प्रीतिदानं भोजनं वे तनं तैर्हेतुभूतैर्ये
मम नित्यमनुगताः सेवकाः।१३। तेऽपि संप्रत्यस्य महीभृतामनुवृत्तिं सेवां प्रसादादिभिरेव।
हेतुभूतैः कुर्वंति ध्रुवमिति वितर्के। काकाक्षिवदेनुभूतं प्रसादादिकमुभयत्र संबध्यते। आदायांत
तुरीयांशोऽंशोव्ययः सम्यग्व्ययः ततोऽन्यथाऽसम्यग्व्ययः तच्छीले स्तोकान्तिभिः। अथवा व्यसनविष
यिभिः।१४। अतिदुःखेनेत्यत्र षाण्मासात्तादि तिरगान्तनिबंधः।१५। विप्रेति भागुरिसंबोधनं मेधसो
विप्रस्यामन्त्रणमयेवं मेधो विशेषणं वा। अभ्यासे निकटे। शैवैरुपः तेन राज्ञा भोऽइत्यामंत्रणो अत्राप्य
मे।१६। इष्टवियोगचिंतनशोकः दुःखनिबंधनचिंता वसादो दैन्यमनस्यं। सशोक इव नुपरतश
रीतत्वात् दुर्मना इव क्रियास्वस्थिरत्वात्।१७। इतीदृशं भूपतेविम्बं मेरणोदीरितं वचश्राकर्ण्य
श्रुत्वा स वैश्यस्तं भूपतिं प्रश्रयावनम्र इत्युत्तरं दत्तवान्। प्रश्रयेऽविनयेनानम्रः।१८। पुत्रैर्दारैर्निरा

दु॰ टी॰ स्वजनैश्च निरस्तो भर्त्सितोऽसाधुभिरिति हेतुगर्भं विशेषणं ।१९। न केवलमधिक्षिप्तो धनमा
८ दाय निरस्तो निःसारितः। एवंधनादिभिर्विहीनो वनमभ्यागतो दुःखीत्यन्वयः।। आप्ता सुहृदः बांधवा
ज्ञातयः।२०। स तथाविधोऽहं कुशलाकुशलात्मिकां शुभामशुभां वा प्रवृत्तिं वार्त्तां।।२१।। प्रवृत्तिमेव
विवृत्य दर्शयति किन्विति। किमिति संदेहे। न्विति वितर्के। तेषां पुत्रदारस्वजनानां गृहे कुशलत्वावस्था
दौ क्षेमं कल्याणं। अक्षेममकल्याणं सांप्रतमिदानीं। कथं किंविधाः। सत् समीचीनं वृत्तं शीलं येषां
।।सुता दुहितृदारादीनामुपलक्षणं।।२२।। हेतुभूतैर्लुब्धैर्यैः पुत्रादिभिर्भवान्निरस्तस्तेषु भवतो मनः।
स्नेहं किमनुबध्नाति निराशाः प्रश्नः।।२३।। अस्मद्गतमस्मद्विषयं वचो भवान्यथाप्राह तदेव मे
वतथैव निष्ठुरतां पारुष्यं।।२४।। यैः पुत्रैर्दारैः स्वजनैः पितृस्नेहं पतिस्नेहं स्वजनहार्दं च संत्यज्येत्य
न्वयः। निराकृतस्तस्य क्षीणोऽस्मिन्नेषु तथाविधेष्वपि मे मम मनो हार्दिं सस्नेहं एवकारो भिन्नक्रमो हा
र्दीत्यास्यानंतरं द्रष्टव्यः। हे महामते विगुणेष्वपि विरुद्धगुणेष्वपि बंधुषु यच्चित्तं प्रेमप्रवणं स्नेहा
नुबंधं जानन् ज्ञानवानपि नाभिजानामि तत्किमित्यन्वयः।।२६।। कृते हेतोः निःश्वासो दौर्मन
स्यं वर्जयत इति यथायथा वचनमन्वयः। अप्रीतिषु प्रीतिमत्स्वेषु यन्मनो न निष्ठुरं। अप्रीति ८

सुनिष्ठुमिति पाठेऽप्यसत्या सुनिष्ठुरं न जायते इत्यनुषज्यते तत्किं करोमीत्यन्वयः ॥२७॥ देविप्र
तं मेधसं समुपस्थितानुपसन्नो पार्थिवेषु पृथिवीश्वरेषु सत्तमः ॥२८॥ यथान्यायं यथाशा 9
स्त्रं यथार्हं यथाचारं तेन मुनिना सह संविदं संभाषां । संवित्स्त्रियां प्रतिज्ञायामाचारे ज्ञान
संकरे । संभाषायां क्रियाकारे संकेते नाम्नि भाषणे इत्यभिधानात् ।२९। यदेकं वस्तु स्वचि
त्ते स्वहृद्यापन्नं तन्निरोधं विना मे मम मनसः दुःखाय दुःखकारणं भवति तद्दुःखेत्यर्थः । भा
षणोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वद इत्यात्मनेपदं ।३०। गतराज्यस्येति सुपांसु
लुगिति सप्तम्यर्थे षष्ठी राज्यादौ ममत्वं यन्मे तत्किं निबंधनमित्यर्थः । गतस्य राज्यस्य या
नि राज्यांगानि तेषु ममत्वं किं निबंधनमिति वा ज्ञेो ज्ञेनीयं । कश्चित् ममत्वं मम राज्यस्येति पा
ठस्तदापि राज्यस्येति षष्ठी पूर्ववदेव व्याख्येया । स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्यां
गानि प्रकृतयः पौराणां श्रेण्योपि चेति राज्यांगानि ।३१। अयं वैश्यः निष्कृतो दुःखी कृतः । न
क्ति तस्य कः । तथेति समुच्चये । अतिशयेन स्नेहवान् ॥३२॥ तत्पादनेरक्षणे नाशे च दृ
ष्टो दोषो दुःखजनकत्वरूपो यस्मिन् एवं भूते पि विषये राज्यवित्तकलत्रादौ ममत्वेन ।

दु. टी.
५

कृष्टमानसं यतोऽसौ एष वैश्योऽहं राजा च एवमनेन प्रकारेणात्यन्तदुःखितौ ॥ २२ ॥ हे महाभा 10
ग हे अथैममास्य च ज्ञानिनोरप्यावयोर्यन्मोहो दुःखज्ञेऽपि विषये सुखजनकत्वप्रतिसंधा
नं भवति तत्किमेतत् केन कारणेनेत्यर्थः । न त्वस्मादृशां मोहो भवति तु मन्दमतीत्याह । एषेति विव
स्त्रपरिच्छेदो विवेकस्तत्रान्धस्य तद्धीनस्येत्यर्थः । अथवाविवेकान्धस्याविवेकिन एतादृशी मू
ढता भवति न तु विवेकिनस्तत्कथमावयोर्मोह इति भावः ॥ २४ ॥ ज्ञानिनोऽपि यन्मोहस्तदे
तत्किमिति राज्ञः प्रश्नात् ज्ञानमात्रस्य मोहव्यधिकरणं राज्ञोऽभिप्रेतं तदनुपपन्नं प्राणि
मात्रस्य ज्ञानमत्र सत्वेन निर्मोहत्वप्रसंगादित्याह । ज्ञानमिति । समस्तस्य जन्तोः प्राणिमा
त्रस्य विषयगोचरे विषयेऽस्त्याहारनिद्राभयमैथुनादिप्रतिपत्तौ वा ज्ञानमन्तःकरणवृत्तिरस्ति ना
स्ति च मोहाभाव इति न ज्ञानमात्रस्य मोहव्यधिकरणमित्यर्थः विशेषविज्ञानमपि भिन्नविषय
कमेव भवत्तस्यापि न मोहव्यधिकरणं को मोहः कः शोक एकत्वमनुपश्यत इति श्रुत्या
ऽभेदज्ञानस्यैव मोहव्यधिकरणस्योक्तत्वात् इत्यभिप्रेत्याह विषयश्चेति । हे महाभाग
विषयश्च रूपरसादिः पृथक् पृथक् भिन्नस्वभाव वरसंख्य मात्मकमेलपाति अन्यपतिष ५

ते जातिभेदेव मिति पाठे व्याख्या परस्माद्द्विविषयत्वप्रयुक्तभेदे एवं मनुष्यत्वादिजातिरपीत्य
र्थः ॥१५॥ विषयभिन्नत्वमेव द्रढयति । उलूकादयो दिवांधा अथो रात्रौ पश्यंत सुखं भवति
अपरे काकादयो रात्र्यंधाः । कुत्रचित् किं तु उलूकादयः स्थावरादयश्च दिवा रात्रौ चांधाः । केचि
त्समाः ॥१२॥ नो वानरमार्जारादयो दिवा रात्रौ च तुल्यदृष्टयो ऽनंधा एवेति तु ल्यदृष्टिपदमंधानं
धविषयत्वेन द्रष्टव्यो ज्ञानीयं । एतेन ज्ञानमात्रस्य मोक्षहेतुत्वे ऽधिकरणे परास्तं ज्ञानादातु उलूकादीनां
मोक्षो न स्यात् किं तु उलूकादीनां सर्वदैव स्यादेवेति सर्वमोक्षप्रसक्तिरिति सूचितं ॥१६॥ अ
थ नास्माभिः सर्वसत्त्वानां ज्ञानित्वमभिप्रेतं किं तु मनुष्याणामेवेत्याशंक्याह । ज्ञानिन इति । किं
मनुष्याणां ज्ञानित्वमेवोत मनुष्याणामेव ज्ञानित्वमिति विकल्प्याद्यं दूषयति । सत्यमिति
मनुजा ज्ञानिन इति सत्यं ते मनुजाः केवलं ज्ञानिन एव न हि किं च ज्ञानिनो पीत्यर्थः । एवं चा
ऽज्ञानसंवलितज्ञानिनो पि ज्ञानित्वे ज्ञानसंवलितानां ज्ञानवतो ऽज्ञानित्वमेव किं न स्यादित्यपि
वक्तुं शक्यत्वान्मनुष्याणां ज्ञानित्वमेवेति पक्षो दुरुपपादनीय इत्यपि सूचितं । न द्वितीय इ
त्याह । पश इति । हिशब्दो ऽप्यर्थो भिन्नक्रमः । पश्वादयो पि सर्वे यतो ज्ञानिनो ऽज्ञानसंवलि

दु॰मी॰
६

12

तज्ज्ञानस्य सम्भवात् अतो मनुष्याणामेव ज्ञानित्वमित्यपि पक्षो न संभवतीत्यर्थः पशवो ग्राम्या गवादयोऽर
ण्याश्चारण्यादयः । अथवा केवलं मे ज्ञानिनो न हि किं त्वन्येपि ज्ञानिनः संभवंतीत्याह । पत इति । पक्ष्यादीना
मपि विषयज्ञानसंभवात् ॥२७॥ ननु सर्वेषां ज्ञानवत्सामान्येपि मनुष्याणां ज्ञानेकश्चन विशेषो भविष्यतीत्या
शंक्याह । तेषां तादृशं मृगपक्षिणां यत्त्वादृशं ज्ञानं तत्तादृशमेव मनुष्याणामित्यन्वयः । मनुष्याणां
च यत्त्वादृशं तेषां मृगपक्षिणामपि तादृशमिति तद्धेतुरध्याहारेणोत्तरार्द्धे योजनीयं यत्तदोर्नित्यसं
बंधात् । अथ ऽन्यदाहारादिकं मनुष्यभयोः पश्वादिमनुष्ययोस्तु त्वंसाधारणं तथा चाह । आहारनि
द्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणां । ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः स
माना इति ॥२८॥ अर्थं किं वा विषयज्ञानादि साधारणमेव मनुमात्रस्यास्तीत्याह । ज्ञाने पीति । अपत्यानां
मुखे भक्ष्यनिक्षेपसंततिर्बालमेव तत्त्रिभिर्विध्यतिन स्वस्येति ज्ञाने सत्यपि ममत्वलक्षणान्मोहाद्धेतोः
शावचंचुपुअपत्यमुखेषु कणमोक्षादन्नादेर्हारनिक्षेपपराज्ञानेतान्वक्ष्यंतां जवतिनः । पतंगान्पश्य
। विषयिकज्ञानमोहयोः समानाधिकरण्यं सस्मात्कुवीत्यर्थः ॥२९॥ व्याघ्रशब्दः श्रेष्ठत्वधाचीनश
ब्दः संबोधनार्थः । ननु भो मनुजव्याघ्र त्वत्प्रत्युपकारायपयोपरणाद्युपकारार्थं यो लोभस्तस्माद्धेतोरे

६

तेमानुषाः।सुनाञ्जनिभाषाः साकांक्षाः इति किं न पश्यसीति वाक्यार्थकर्मत्वादिति शब्दाध्या
हारेण योजना। मूढा गोधावतीति पश्यन्तीति वर्त्तमानेन मनुष्यविशेषनिष्ठज्ञानविशेषमोहद्विरो
धानद्भावाद्वर्तमानोऽर्थोऽनुपपन्नेति सूचितं। ६। ननु सर्वेषामपि मोहनिवर्तकज्ञानार्थं
प्रवृत्तिः कुतो भवतीत्याकांक्षायामाह। नयापीति। वैषयिकज्ञानमोहयोः समानाधिकरण्य
साक्षात्कारे सत्यपि महामायानुभावेन कतिमानुषामोहगर्ते मोहस्याकरे वैषयिकज्ञाने निपा
तिताः। निक्षिप्ताः। तेषां विशेषणं संसारस्थितिकारिण्या इति। अपूर्वदेहेन्द्रियविषयादिस्वीका
रः। संसारस्तस्य स्थितिर्येकर्तृकर्मोपायाचरितं तु शालेये बांप्रवृत्तिमार्गोऽणंतं संसारस्थितिकारि
ण्यः। अथवा संसारस्थितिकारिणो विष्णोर्महामायाप्रभावेति योज्यं। कथं मतं मोहगर्ते मम
तावर्त्ती अस्वीये स्वीयबुद्धिर्मिनतनासेवावर्त्तीभसांभ्रम इव यस्मिन्। नुपसंहरति तदिति त
त्तस्मादत्रभवन्मोदे विस्मयो न कार्यो न करणीयः। यस्मात्तन्महामायाया जगन्मोहेतेन
नु कारणमहामायेत्याकांक्षायामाह बोगेति। महामायानामहरेरीश्वरस्य योगनिद्रापरमा ने
हमपीशक्तिः। जगत्पतेरिति भगवतो ब्रह्मकोटिवदहिमीवस्यच कं विशेषणं। चकारो वधारणार्थे

दु. टी० स्तयैयन्ते संवध्यते तदेवेत्यर्थः। ४२। न केवलं प्रवृत्तिमार्गे एवामसौ मोहिका भवति किंतु ज्ञानिनामपी
७ त्याह। ज्ञानिनामपीति। सा त्वसिद्धादिवज्ञानवतामेव शक्तितः आकृष्य विवेकाद्यावर्त्य मोहाय प्र
यच्छति मोहानुगामीनिकरोति ज्ञानविशेषवतामपि चेतांसि तत्र भवद्धिध्यानीकाक ध्येति भावः। ४३
तयाम्भलघुकृतिरूपया विसृज्यते विविधं सृज्यते विश्वं जगत् चराचरमिति पर्यायशब्दैरेवांतरका
र्थ्यविशेषणं हंते। सा बंधकारणमप्यवाप्रसन्नानुपासनया प्रीता सती मोक्षाय भवति। ४४। अस्या
बंधमोक्षकारणत्वं समर्थयते सेति। विद्या बलज्ञानलक्षणा परमपुरुषार्थसाधनत्वात्। संसा
रएव बंधस्तस्य हेतुः। चशब्दादनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिर्विधारूपा
चसा। सर्वेषां ब्रह्मादितृणान्तानामीश्वरीष्ट हत्रिनिहत्यादिव्यापारजननी। ईश्वरीत्र्याद्यतेष्ठा
अथवा सर्वेश्वराणां ब्रह्मादीनामीश्वरी सर्वेश्वरेति राज्ञः संबोधनं वा। ४५। हरे योगनिद्रेति संक्षे
पेणप्रक्तां महामायां विस्तरतो ज्ञातुं पृच्छति भगवन्निति। महामायेति यं भवान् ब्रवीति सा काहि
शब्दः प्रश्ने संबोधने वा अस्याः किमिति चकारो भिन्नक्रम मम पावोत्पन्नीवः। ४६। यत्स्वभावाय
इत्थंलक्षणा यत्स्वरूपावदाकारा यदुद्भवा यत्कारणिका। ४७। त्रपम उत्पन्नो त्तरं नित्येति।

द्वितीये व्याचष्टे सेति। जगद्देवमूर्त्तिर्व्यक्त्याकारो यस्याः। तन्नीरंध्रे वा।। एतयेति। इदं सर्वं तया ततं।
व्याप्तमित्यस्या व्यापकभावत्वाभिधानेन कारणभूतत्वोक्त्या तृतीयप्रश्नस्योत्तरं दत्तमिति
मंतव्यं। नु तस्यास्यादिकर्मे च सर्वस्यानयैव कल्पत इति व्यापकत्वाभिधानेनैवोक्तमिति मंतव्यं।
तुत्पत्त्यनुपपत्तमेनाह। तथापीति। नमेत्यव्ययं पंचम्यंतं मत्त इत्यर्थः। ४६ ननु नित्यत्वोत्पत्तिमत्त्वयोः
परस्परविरोधात्कथमेकत्र स्थितिरित्यत आह। देवानामिति। आविर्भवति प्रकटीभवति। ४७
अत्रेति क्वासमवतारयति। योगेति। सकललोकजलानामेकीभावात्। एकार्णवीकृते। आस्ती
र्यशयनायं कृत्वा शेषमनंतनागमभजत्। अध्यास्त। कल्पांते ब्रह्मदिवसावसाने। ५० ब्रह्मा
णं विरंचिं। नुदंतौ हंतुमुद्यतौ। ५१।। प्रजानां पतिर्नियंता। चकारो तुष्यकालताद्योतनार्थो।
५२ एकाग्रहृदयो नन्यनिष्ठांतःकरणः स्थितः स्थिरः। निद्रापानेत्रवोरेवाभिव्यक्तेहरिनेत्र
कृतालयामित्युक्तं वस्तुतस्तु सर्वांगस्थितैव सा। ५३ स्तुतिमाह विश्वेश्वरीमिति। जगद्धात्री
जगत्कर्त्रीं। अनुत्तमसाधारणमादित्यादीनामपि प्रकाशकं तेजो जन्यत तस्य विष्णोर्निद्रां सो
भिवाचाहूजयामि। कचित्तोमात्याद्दिपधार्ध्यस्यानेनिद्रां भगवतीं विष्णोरतुलां तेजसः प्रभु

दु॰सं॰ शितिपठित्वा वृत्तो वा चेति पठित्वा। ततश्चतुर्थ्यावेत्यनेनैव पूर्वश्लोकस्यैतान्वयः। अतुलात्मन
८ न्यसमं। तेजसो ज्योतीरूपस्य विष्णोः प्रभुरिति बुद्धिस्थो विशेषणं तेजसः अमुत्र भेति वा ते
जसोऽनुत्तमो पूरस्यार्थे करणे षष्ठी वा यस्मात्तेजसस्तुल्यान विद्यते इति वा। ५७। शरीरेणनयान
केननमः। आकाशं। कृत्स्नमशेषमपूरितं व्याप्तं। मीयतेऽनयेति मा परिमाणं तां वनता गच्छता मा
वनतानमावता। अमावता अपरिमितेनेत्यर्थः। अथवा अमा रविरश्मिविशेषः तां वनता गच्छता
स्यशतेति यावत्। अमानामरवेरश्मिः सहस्रलोके न तिष्ठति तद्गतिस्मरणात्। वदत्सु माय
ता सहगच्छता। अर्थोदहदामसेन। अमासहसमीपे चेत्यभिधानात्। यद्वा मनंमाकाम
धातोर्घञि यातो युक्तिति सुनागमे च कृते माय इति निष्पद्यते। न विद्यते मायो यस्य सोऽमायः
। तत आचारार्थे क्विप् ततः शतृप्रत्ययस्ततस्तृतीयैकवचने अमायवदाचरति अमायति अ
मायतीति अमायन्न तेनेति विग्रहः। यद्वा मां मानं रातीति मायः कर्मण्यण्। न मायो मायस्त
स्यभावोऽमायवता तयाऽतिमहानित्येकं पदं। अथवा माङ् माने देवादिकस्तस्माल्लट् छांद
सः। शतृप्रत्ययः। सुखां शब्दस्य शंप्युमं तनं प्रतिशश्वत्स्वातादेव रूविदेनमंत्रः। स्वधा ८

त्रिधापि त्रयविर्देवमंत्रैः। वषट्कारोपवते ऽत्रेति वषट्कारो यज्ञस्तत्स्वरूपा। स्वरानुदात्तानुस्वरितस्वंज्ञा
स्तदात्मिका। क्वचिद्वषट्कारस्वरात्मिके त्येकं पदं। स्वधामंत्रस्वरूपा त्वं हि अक्षरे नुपचयापचयपरि
णामहीने। नित्ये जन्मविनाशरहिते। एतेन सन्मात्ररूपत्वमभिप्रेतेति। त्रिधा त्रिप्रकारा या मात्रा
ह्रस्वदीर्घप्लुता अकारोकारमकारलक्षणा वित्वैतेजसप्राज्ञाभिधेया तदात्मिका तत्स्वभावा त्वं। यप
या वार्द्धमात्रा व्यंजनरूपा नित्या परिणामादिरहिता विशेषतो मात्रात्रयवैलक्षण्येनानुच्चार्या वेदां
तवाक्या परा पर्यन्तलक्षणा मुक्तिरूपालोके स्थिता सापि त्वमेव एतेन परब्रह्मस्वरूपा त्वमसीति वि
वक्षितं। तथा च दत्तात्रेयेणाप्युक्तं। अकारश्च तथोकारो मकारश्चाक्षरत्रयं। एता एव त्रयो मात्राः
सत्वराजसतामसाः। निर्गुणा योगिगम्या या चार्द्धमात्रा च संस्थिता। गांधारीति च सा ज्ञेया गांधा
रस्वरसंश्रयाः। पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्ध्नि लक्ष्यते। मात्रा चार्द्धं तथा प्रोक्तं विज्ञेयाः पर
मार्थतः। यज्ञात्तु प्रथमा मात्रा द्वितीया यज्ञसंज्ञका। मात्र तृतीया चिच्छक्ति रर्द्धमात्रा परं पदमि।
ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंज्ञता। तृतीया तु प्लुता अर्द्धाख्या वचसः सा न गोचरेति। सावित्री
मध्याह्नसंध्या। दे देवी द्योतनशीले। परा प्रकृष्टा जननी इति राद्धि जननी क्वचित्कदाचित् किंचि

त् किं चिद्देवजननयति त्वं गुन तथा सर्वजननीत्वादित्यर्थः। देवजननीति पाठे देवानां मातादितिस्त्व
मेवेत्यर्थः॥ पद्य॥ अंते प्रलयसमये त्वं अस्ति महत्त्वमसि आत्मस्वाकारोपीत्यर्थः। प०॥ न केवलं
सृष्ट्यादिकर्तृस्वरूपाणि त्वं अपि सृष्ट्यादि क्रियारूपापि त्वमेवेत्याह। विसृष्टाविति। विसृष्टौ
सृष्टिकाले। पालने स्थितिकाले अंते प्रलयकाले संहृतिरूपा संहाररूपापि त्वमेव। हे जगन्मये ज
गद्रूपिणि। मयट् प्रत्ययं ताज्जगच्छब्दात् टिड्ढाणञिति सूत्रेणं ङीप्प्रत्यय एव प्राप्नोति न टाप् तथा
पिवाद्युलकानट् टाप् प्रयोगः। अथवा मय गतावित्यस्माद्धातोर्जगंति मयं ते ज्ञायंते स्यामिति जगन्म
येति मुत्पादनीयं। अथवा जगतो मयः प्रक्षेपोऽस्यामिति डुमिञ् प्रक्षेपणे इत्यस्माद्धानिर्व्वादनी
यं। पच महती सर्वविषयाज्ञानत्वमस्यादि महाविद्या कवच ज्ञानाविद्या महाविद्या। महती सद्विदानंदरू
पे जीवात्मनि संसाररूपा माया। नमासहे। तु महती माया महामाया महाविधेति पाठवान्त। महामेधा स
वीवधारणक्षमाधीः सर्वज्ञसक्तिरित्यर्थः। स्मृतेर्मन्वादिशास्त्रादपि महती महास्मृतिर्वेदवि
धेत्यर्थः। महतो नानाविधसंसाररूपस्य मोहस्य निमित्तत्वान्महामोहा महाविधेत्यर्थः। भवती
त्वं। महतामिन्द्रादीनां स्वाधिकारस्थापनरूपा देवी महादेवी॥ महतां मधुकैटभ तिरस्कारकाद्य

सुराणां सामर्थ्यातिशयस्वरूपत्वान्महासुरामर्दितोऽप्यामीदृशं सामर्थ्यं स्वाभाविकं येन भगवा
नपि पराजित इव तेभ्यो मोक्षं स्वस्वरूपमनंतं दत्तवान्। तस्माद्येन सामर्थ्यातिशयेन युद्धादि
नाम भगवंतं प्रसाध संसारान्निवर्त्तते ताहृशं सामर्थ्यं भगवती स्वरूपात्मकमेवा केचित्तुम
हादेवी महासुरापद्योरे कार्यत्वमंगीकृत्य तत्कृत्यर्थत्वान्यो नरुत्तयं न दोषावेति न चिंत्यं यानु
करीष्यामि न्यार्थत्वे दोषाभावात्। प्रकर्षेण करोनामि प्रकृतिः वृकुलाधिकारत्वामकर्त्तरी
क्तिन् श्रौणादिको वा। परमाणवादीनां मूलकारणत्वनिरासाय निष्क्रयार्थोहि शब्दः। सत्व
रजस्तमो लक्षणं गुणत्रयं विभावयति नु मनुवर्त्तयितुं शीलं यस्याः। कालेन भरणेनोपलक्षि
ता रात्रिः कल्पांतरात्रिरित्यर्थः। महतश्च परस्य रात्रिर्महा प्रलयरूपा महारात्रिः। जीवन्
प्रतिब्रह्मस्वरूपावरण लक्षण मोहरूपा रात्रिरपि त्वमेव ब्रह्मज्ञानातिरिक्तेनापि परिहर्तुं
न शक्यत इति कारणाद्दारुणाहृं। श्रीर्लक्ष्मीः संपद्वा। ह्राकरणीय वैमुख्यं बुद्धिरंतःकरणं
वोधलक्षणा शुभ्रध्यवसाय व्यापाररूपा लज्जा कृते करणीये वापरत्वात्वशंकयांऽखं। केचित्तु
ह्रीलज्जयोः समानार्थत्वेन पौनरुक्त्यमिपाकृश्री शब्दं मंत्राक्षरपरतया व्याचक्षते। पुष्टि रूपच

कु॰ स्तो॰ १० यः तुष्टिः संतोषः । शांतिरंतरिंद्रियनिग्रहरूपा । क्षांतिः शक्तौ सत्यामपि परकृतापकारसहिष्णुता । र 20
कस्याऽज्ञानेकस्वरूपत्वात् संभावनानकर्तव्याऽसंख्यशक्तित्वादित्येवकारार्थः ॥६१॥ त्रयस्ता
गद्याविधेनैयस्याः सागद्दिता । चापिनाधनुष्मती । वामेत्याकारांतपाठेऽर्शआदिभ्योऽजितिस्
त्रैरामत्वर्थीयमनूत्रत्ययमानोवप्रशस्तावामायस्याः संतिमावामेतिसाधनाम् । वामामुमुंडा
परिधावुधेत्येकमेवपदं कचिन्नद्यावामाः शराः मुखाः मुंडीमुमुंडीगजमुंडाकृतिरायुधविशे
षः पृषोदरादित्वादुकारस्यह्रस्वत्वं । परिधालोहा । स्वर्गेहेतुत्वात् । अशेषसौम्येभ्यः सकला
ह्लादकेभ्योऽतिसुंदरी । अधिकमनोहरानिर्वाणरूपत्वात् । परस्यां ब्रह्मादीनां परापकृष्टा । प
राउ । कृष्टामामाया मोहनशक्तिर्यस्याः सापरमा । परमारमा ब्रह्मादीनामपि ईश्वरी नियंत्री
॥६२॥ सहर्तमानमसहनीनानागतंयद्वस्तु नस्यशक्तिः स्वभावः सामर्थ्यं वामेवपदानदाकिं
स्तु पसेकस्यापिस्तु पसेकस्यापिस्तु तिविवधानमवसीत्यर्थः ॥६४॥ ईश्वरो जगत्स्रष्टारज
त्रिमद्रूपेण । पतिविष्णुरूपेण । अत्तिभक्षयतिरुद्ररूपेण सोपिययानिद्रावशंनीतस्तादृशी
त्वांस्तोतुं कईश्वरः समर्थः । नकोपीत्यर्थः ॥६५॥ ननुब्रह्मादयः कर्तुमकर्तुमन्यथाकर्तुंसम

र्थाः। स्तोष्यन्ते वेत्याशंक्यते पि त्वदधीनसामर्थ्या इत्याह विभुरिति। मुदं ब्रह्मा इशानो रुद्रस्ते
तथा शरीरग्रहणं कारिताः। ६६। सा पूर्वोक्तस्वरूपा। इत्यर्थे मेवं विधैः प्रभावैर्म्मोलान्ये रुद्रा
देरसाधारणैः॥६७॥ एतौ हंतुमध्यवसायपरायणो बोधमग्नाः स्वजगत्स्वामिनः क्रियतां॥६८
तामसी निद्राकारपरिणताऽविद्याशक्तिः तदुक्तं॥ तामसी यं नाम सी शक्तिरविद्याप्रकृतो
ता। ययाच्छादितलोकोऽयं यस्य न्नापि न पश्यति। वेधसा वृत्तरूपा॥६९॥ पूर्वश्लोकस्यं विष्णो
रितिपदमनुषज्य विष्णोर्नेत्रादिभ्यो निर्गम्य ब्रह्मणो दर्शने चक्षुर्विषये तस्यो देवा त्यनुष
ज्यते पूर्वश्लोकात्। नेत्रादीनां प्राणांगत्वे पीतरेतरयोगः षष्ठ्यादशः। दधिपयआदिष्वपाठा
देकवद्भावो न भवति नास्ति कारणं यो धर्माद्येरावितिर्वि देशेनप्राप्त्यगहंद्वैकवद्भावानित्य
त्वज्ञापनाहानदोषः। हृदयं मनः। उरो वक्षः। न केनापि प्रमाणेन न व्यज्यते स्वप्रकाशत्वादित्य
व्यक्तं ब्रह्म तस्मात् ज्योतिर्मयस्य।७०। अतिशयनात्सर्पेन्यावत् उन्नत्वाविस्पष्टः। स जगन्ना
यस्ता वसुरोदहशेनावपिमगवं तेद हशाते इति परस्परकर्म्मिता लक्षणकर्म्मव्यतिहारा
र्थे कात्मनेपदप्रयोगात् लभ्यते। चकारद्वयेन दर्शनोत्थानयोस्तुल्यकालत्वं द्योत्यते।७२

मधुकैटभौ दुरात्मानावितिनवाक्षरच्छन्दः सः। वीर्यमुत्साहः पराक्रमः शक्त्यतिशयः। 
ब्रह्माणं हन्तुं प्रहिणुं जनितमोदमावारयतैवतौ ॥७२॥ पंचवर्षसहस्राणीत्यत्यंतसंयोगे द्विती
या। बाहुप्रहरणः प्रहरणानि यस्मिन् सामर्थ्ये सत्यपि लीलया युद्धं कृतवान् बहुकालमिति
विभुरित्यनेनान्वयः ॥७३॥ अस्मत्त इति पंचमी द्विवचने तसिल् सर्वे सत्तिपदिकविहितः।
पंचम्यास्तसिलिति सूत्रविहितस्तस् किं सर्वनामबहुभ्योऽद्व्यादिभ्य इति नियमेनास्य छन्द
स्त्वप्राप्तेति भावः। मां वरः इष्टोऽर्थोऽध्रियतामित्युक्तवंतौ। नन्वस्मद्वधमेवायं वरिष्यानी
तौ तां प्रांकथं न तर्कितमित्याकांक्षायां मायामाहात्म्यमयमाविमोहिताविति ॥७४॥ भवं तुष्टौ वदि
मे तुष्टौ तदा मम वध्यावुभावप्यद्य भवेतां ~~मांकथं न तर्कितमित्याकांक्षा~~ अत्र चरणावि
दित्यत्रावि विवक्षितत्वान्न संधिः। द्विशब्दोऽवधारणे एतावदेव मया वृतम् ॥७५॥ इति पूर्वो
क्तप्रकारेण वंचिताभ्यां ताभ्यां सर्वं जगत् आपोमयं जलव्याप्तं विलोक्य भगवान् गदितः उक्तः। ननु वि
कारस्यैव नित्यमेकवचनमवइति मयट्प्रत्यये सति अप्मयमिति भाव्यं कथमापोमयमिति चेत् तत्र अ
पशब्दः सकारान्तोऽपि जलवाचीति सिद्धान्ता आपोहिष्ठा मयो भुवः आपो भिर्मार्जनं कुर्यात्। अ

पोमयमिदं सर्वं त्वमायोमूर्त्तिः शरारी रंगा। त्वमंतः सर्वभूतानां मंतश्चरसिसाक्षिवदिति वयोग
दर्शनादिति वृमः। आह व्याज्ञावित्यस्माद सुनन्त्यपां नान्मवट् चन्त्यवमानीयसाधयंतिके
चित्। अथवामेवदिसाया मित्यस्माद्गृत्यये सतिन समासानन्तरमयमितिरूपं। अस्मि
न्पक्षे सर्वं जगद्वापद्गतिविलोक्यामयमदिं सनंव व्याख्यात्वया कार्नेलक्षणो गदितेत्यर्थः
। अमयं विष्णुमयं जगद्वापविलोक्य नाभ्यां ~~मद्दितोमम्मवान्~~ इति विलोक्य गदित इति वायो
जनीयोऽर्हः। किं गदित इत्यपेक्षायामाह। नव पुत्रेन पीतो संतुष्टो त्वऽसभवावः। त्व इति
त्वडुत्तमपुरुषबहुवचने असमुदाय्यस्यरूपं। त्वाष्मो नुरूपः। त्वदिति पंचम्येकवचनं त्वत्त इ
त्यर्थः। देवक्याष्मो गर्भः समभूत्सु भविष्यतीति हरिवंशपाठदर्शनवलेनत्वमिति। त्रयमां
तत्वेन केचित् व्याकुर्वंति तन्मंदं। मिन्नुबकके वाक्येप योगदर्शनस्यानिपामकत्वात् त्रयमां
जेमक्षणापत्तेरवः। अकात्वात्तन्नगतोऽर्हं गीकृतो नद्दंगीकारस्यान्यायत्वाच्च। उर्वी पृथिवीयत्र
सलिलेन परिप्लुतात्पान्नात्तत्रावीघातयेन्यर्थः। ७७। तथैव तुष्टा मया वैवचनमंगीकृत्य जघने स
क्लिन्नद्वयमस्ले कृत्वा तयोः शिरसी छिन्ने इत्यन्वयः। देहस्य पार्थिवत्वात् जघनमपि पृथि

पवीततयोर्वचनं कृतमेवेति मंतव्यं। अस्मिन्श्लोके। ऋषिरुवाचेत्युक्तिरूपसंख्या राशिश्लोपे
ण॥ इतः पूर्वाध्यवर्तमानकथाभिप्रायेणोक्तिवाक्यभेदान्तपोरुक्तं। परमप्रकृतमुपसंहरति
एवमिति। प्रभावं स्वेच्छाकृतं जन्म ताभ्यां सावर्णौ मवं सावर्णिकं अध्यात्मादित्वात्ठञ्। सा
वर्णिरेव सावर्णिकः सावर्णिकस्येदं सावर्णिकमिति वा तत्संज्ञके। इति मधुकैटभवधः॥
मूप: स्वरूपित्वमिदि तं तत्रैलिरासमवतारयति। देवासुरमिति। देवाश्चासुराश्च परस्परत्नौरोविधं
ने अस्मिन्न तद्देवासुरं युद्धं मन्वर्थी याचत्वस्त्वयेनसाधनीयं। अथवा देवासुराणामिदं देवासुरमि
त्यण्प्रत्ययेन साधनीयं। अस्मिन्पक्षे हेद्व भावस्कंद्वसः। परपदवृद्धिर्वाछांदसी। अथवा देवैः
सहासुरं युद्धं देवासुरं। अव्ययशातमिति अत्यंतसंयोगे द्वितीया। असुराणामधिपे राजनि महि
षे देवानां च पुरंदरे ऽधिपे सतीति काकाक्षिवदुभयपक्षाधिपपदं योजनीयं।१। तत्र युद्धे। इंद्र
सुरराट्।२। पद्मयोनिं ब्रह्माणं। प्रजापतिमिति तस्य विशेषणं। ईशो रुद्रः।३। आयथाहत्तपंथा
मृतं। तयो रीशगरुडध्वजयोः। तद्वृत्तं तथैवाचिट्ठ्याः देवाः। देवाभिभवस्य विस्तारो यत्र महि
षासुरविचेष्टिते तत्र।४। सः महिषासुरः। अधितिष्ठति करोति।५। निराकृताः निःसारिताः १२

दुष्टेनेकदोषयुक्ते देहे आत्मबुद्धिर्यस्य सदृशाभानेन। द्वाव इति गुरुत्वादेकशो वहुवचनं। प्रपन्ना
आगताः स्मः भवामः।७। भ्रकुटीललाटवक्रतानयाकुटिले आनयने यथोः। भ्रुवः कुटी पृषोद
रादित्वाद्ध्रस्वता। भ्रकुटीति वा पाठः सा दापि पृषोदरादिरेव चक्रिणो विष्णोः ततस्तत्रसावेविभ।
क्तिकस्तसिः। षष्ठी वहुवचने वा तसि लोकां वदनादित्यर्थः। वृत्रस्यः शंकरस्य च वदनादित्य
नुपद्यते॥ए॥ तत्तेजः एकं एकभावं समगच्छत। यथा स्रोता। समगच्छत। त्यात्मनेपदं छांदसं। समो
गम्यृच्छी त्यादेरकर्मकविषयत्वात्॥ अथवा एकमेवैकं चतुर्वर्णादित्वात् स्वार्थे ष्यञ्। एकं सम
गच्छत अभवदित्यर्थः॥१०॥ अतीव अत्युग्रं तत् कूटं पुंजं।११। तत्र पुराणांतर प्रसिद्धे कालायन
नमे। एकस्थं एकाकारेण स्थितं। अदित्यव्ययमानं तत्पुः। नारी अमृतनापोकारे रूपवप्रमता।
त्विषा व्याप्तं लोकत्रयं येन।१२। शंभवं शैवं। तदित्यव्ययं तस्यादित्यर्थः। अन्यथामुखशब्देन स
मासं प्राप्त स्तत्पदः केशादिभिर्नैसंवध्येत। याप्येन वमसंवंधिना॥१३। सो म्येन चांद्रमासेन
तेजसा। जंघेविंतिश्चारंप गत्वादेकवद्भावः। दीर्घतात्वेकवद्भावे वैदिकत्व वासमर्थनीया इति

दुर्गा०
१२

26

केचिदाकुलत्वाद्विंत्यां द्वंद्वे ग्रुरुशब्दस्य घ्यंतत्वे न पूर्वनिपातः स्यात्। न च वाच्यं लक्षणहेतोरिति
ज्ञापकात् घ्यंतस्य पूर्वनिपातानियम इति गतिसंभवे द्विपूर्वनिपातानियमाश्रयणस्य दीर्घतापा
शब्दं दृसत्वाश्रयणस्य चान्याय्यत्वात्। जंघेति जानुमिश्रावेरणैकवचनं। ऊरु इति व्यक्तिभिन्नावेण
द्विवचनं। बाहुरणेन तेजसा जंघाश्रुभवत्। ऊरुनितं वन्यमुवस्तेजसेति। बाहुरणेन चेति चकारो
व्येवं सति सार्थको भवति। जंघासहिते ऊरू जंघोरू इत्यपि वो जयंति। मितंवः कटीपश्चात्भागः
१४। नदंशुल्यः पादांगुल्यः। वरुणानेनेजसेत्यनुषज्यते। करशाखांगुल्यश्च करांगुल्यः। बाहुव इति वा
हूनां बहुत्वाभिधानेन करशाखामपि बहुत्वं न दूष्यते। बाहुकरयोः पूर्वापरभागेन संलग्नत्वात् पास
वैरूद्ध्यत्वात्। कौबेरेणेत्यत्र ज्ञापिते जसेत्यनुषंजनीयं। १५। प्राजापत्येन दक्षादिप्रजापतीनां ते
जसा। पावकोग्निस्तस्य तेजसा। जज्ञे जातं। १६। यातः सायंसंध्यायोस्ताजः भुवावभर्त्तां करण
भ्रनस्य तेजसः करत्व विवक्षया सायं ध्वसि स्थिनत्नी तिवत्। श्रवणेः श्रवणेनेति पयुक्तो वदेशो
॥ श्रवणशब्दान्नपुंसकलिंगादशीश्रादित्वादच्। केचित्तु श्रुतिकर्णेन्तो विवक्षित्वानेदादि

विहितत्पुरुषस्यान्यपेनपुंल्लिंगोभयवचनत्वाद्वोभयनमत्र्यद्वयहितिवदंतीति वुंनपुंसकयोः कर्मणः प्रव
णः प्रवर्णं रुक्मनाविति हेममालिकोयाद्यनुसंधाने नपुंल्लिंगेपि समर्थयितुं शक्यते। अग्निसः
स्यते जसः प्रवर्णावर्महतामिति योजनीयं। अमैयांवापुनासन्यविच्छकर्मा यमनीनां देवानांपा
लितेजांसिते यांसंभवः कार्येशिवादुर्गोस्वरूपमेव। १७। मुदं चिनोत्याशं। महिषादिताः महि
षासुरेनपीडिताः ननु पूर्वस्मिन्नध्यायेवृत्रादीनामपि देव्यधीनतोक्ताः। अत्र समस्तदे
वतेजसा देव्याः संभवकृतत्वाने इति विरोध इति चेत्। न। अत्रापि तत्तेजसा ननदवपवाविभी
वमात्राभिधाने नान्ययीता। १८। विनिकृष्टज्यायपिनाकधृक् रुद्रः। १९। स्वचक्रातः सुदर्शना
त्। समुत्पाद्यजनयित्वा समुत्पाद्येति वा पाठः। एवमुत्तरत्रापि। वरुणः शंखं ददत्तवानित्यनु
षज्यते।। २०।। चापं धनुः। बाणपूर्णौ। अक्षयवाणे। इषवो बाणा धीयंते स्यांव्यंनेषवोस्ता वि
षुधी तूणौ। कौ पृथिव्यां लिश्यति अल्पा भवतीति कुलिशं लिश अल्पाभावे। इत्यस्मादि
गुपधज्ञाप्रीकिरः कः इति कप्रत्यये रूपं। अथवा कुलौ हस्ते शेते इति कुलिशं। शीङ् स्वप्ने इत्य
स्मादन्येष्वपि दृश्यत इति डप्रत्यये सति रूपं। कुलिः स्यात्करसंधयोरिति कुलिशब्दस्य ए

दु.गो.
१४

एवाचितत्वं स्मर्येथे।२१। एतत्: स्मोक्ता: इंद्रः। देवमेदाह्वात्गुः पुनरुपादानेनदोषाय। एवमुत्तरत्रापि
इरानिर्ग्रंथित्तस्यविशेषोविद्यते यस्मिन्नस्याइरावानसमुद्रः। इरावतिभवः। ऐरावतः इंद्रस्यह
स्तीतस्मात्। कालदंडात्समुत्पाद्यते त्यनुषज्यते पूर्वस्मोकात्। अंबुपतिर्वरुणः।।२२।।ब्रह्मा
अक्षमालाकमंडलुंचदद्दाति यस्य स्वयः प्रजापतिरितिब्रह्मणोविशेषणं। ब्रह्मा अक्षमालाक
मंडलुमिति। वामनपुराणदर्शनात्।।२३।।कालोनिमेषादिभिमानिनी देवता। तस्याइतिस्म
रणमात्रसमीह्यावशीरजकस्यवस्त्वं ददाति। अतः पदं ददातीतिवत्। एवंसतिददातिर
र्थेरोवर्तते। अथवा अथातोधर्मजिज्ञासा। अथातोब्रह्मजिज्ञासेत्यत्रसमासांतर्गताषष्ठी प
याचतुर्थ्यर्थे फलदितथात्रापि स्व वमात्मन षष्ठीएकशतं बद्धाथो इति न्यायेनचतुर्थ्यर्थे फ
लिष्यतीतिवयं ब्रूमः। छांदसीवा चतुर्थ्यर्थे षष्ठी। अथवातस्यस्वइस्य आ. स्यातिसपनुरूपं च
मेदत्तवान्। आइतिशातिशापेस्यवं। तस्यै वमेतिचतुर्थ्यंतः पाठः क्वचित्तदासुगममेवाक्षी
रोदः समुद्रः। नजीर्जैते इत्यजरे रुतानेः। अंबरेवस्थे।।२४।।कटकानिवलयानि केयूरानअं
गदानि।२५। नुपुरोहंसकौ। मेवेषकं ग्रीवाभरणं। नविद्यतेऽतनं यस्मात्तदनुत्तमं। अं

गुलीयकरत्नानि अंगुलीमध्यगामुख्यानि। जानौ जानौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते इति
रत्नशब्दो मुख्यत्ववाची। २६। अनेकरूपाणि बहुप्रकाराणि। अमेधं मेनु मशकं। दंशनं
कवचनं। चूडामण्यादिकं विश्वकर्मादत्तावित्यन्वयः। २७। अम्लानानि अम्लानि लीनानि पंक
जानि पद्मां।। अददति ददद्दाने इत्यस्य रूपं। परस्मैपदं तु छांदसं। ददधातो रात्मनेपदित्वात्।
।।२८।। सुरया अमृतेन। अमृतं परिपूरितं।। २९। मणिमयो मतरान् मण्यामणिः नाग लोके भवो ना
नतारसं। नागस्य वतारः। नागो तारत्वमापन्नो वा। धत्ते धरति। इमां पंचाशत्कोटियोजनवि
स्तीर्णत्वेन प्रसिद्धां। संभानीताशतीड स्त्रै रुदात्तास्वरेण साहत्ता संभवत्तात्ससहितं तपयाम्या
न्तथान नादनर्दितवती। अहं भक्के चमुक्के वक्षे भयथैं ग कांतरे। इति मेदिनीकारः।।३१। घो
रकेण भयानकेन नभः। आकाशं। कृत्स्नमशेषमापूरितं व्याप्तं। मीयते अनयेत ऽनयेति मायपरिमा
णं तां प्रभागच्छता मायतानमायता। आमायता अपरिमितेनेत्यर्थः। अथवा अमार विरश्मि
विशेषः। तां प्रतागच्छता स्पृशतेति यावत्। अमा नाम रवे रश्मिः सूर्यलोके प्रतिष्ठित इति स्म
रणात्। यद्वा अमायता सहगच्छता। अर्थादहत्तासेन। अमासह समीपे चेत्यभिधानात्। यद्वा

दुर्गा: मानं मापः। माधनोघे जिघ्रा मो[illegible]तिपु गागमेव कृते माप सूति निष्पद्यते। न विधत्ते मापोवस्य सो
मापः। तत्त्वाचारा थे:। किं शतनः शत स्मये स्मानत नीथे कव चन अमापवदाव रति अमापतिअ
मावनीति अमापन् तेनेतिविग्रहः। पद्मां मानं रुनीतिमापः कर्मण्यण्। न मापो मापस्तस्यमा 30
वोऽमापता नवाऽतिमत्वमित्यकेपदं। अथवा मांडू: माने देवादिक स्तस्मात छांदसः शत प्रत्ययः
। मुखशब्दस्य हृस्वं धूम्रंतरं ज्वलितशब्दः। २२। चुम्जुमिष्पलिताः। वसुहृद्बंधीवते यस्यां सा वसु
धामहीधरापर्वताः। २३। खिं हं वाहृपि नुशीलमस्याः सिंहवाहिनी। तां। आ त्मात्म्रंग स्कारत्वं मूर्त्तिः
शरीरं मन्मान मन्त्रे आत्मह नीएवां। २४। ननु जुत्वस्वं तेति मंथेज्ञ त्वइ तिनिपातना त्संकुमित
मितिमाव्यमितिचेत्। ना संकुचमिव संकुचमि तिउपमानोपमेयभाव स्वविवक्षितत्वात्। संकु
चमाकुलीभूतं सनद्धानि अरिवलसैन्यानियेषां समुन्नस्युत्पद्योगं चक्रुः। उदायुधाः उद्यतास्त्राः। २५। अयस्य
यंकोधाविष्णुरानुकारे। अपधावनशब्दमालक्ष्याभिमुखंगतवान्। २६। त्रिवादीना पापंनोकत्र पंपया। पादाक्रां
त्पानतामस्यर्षा। किरीटेनोद्धिरवितमंवरंखोमपया। २७। धनुर्ज्यानिः स्वनैनस्रोमितानि अशेषपाताला नियपास
मंतात्सर्वेतः। २८। शस्त्रेरस्त्रैश्च्यैः अस्त्रे शस्त्रेश्च्यैः शरादिभिः। शस्त्राणि सैन्यानि चेवी। शस्त्रमायुधलोदवोनित्यभिधानात्

१५

बहुधाबहुप्रकारैः॥३९॥चिक्षुराख्यश्चिक्षुरनामा।चामरश्चामरनामा अन्यैरसुरैः सहितः।चत्वारि रथगज
हयपदातिरूपाण्यंगानि यस्य बलस्य॥४०॥उदग्राख्यः उदग्रनामा।अयुतानां सहस्रेण कोट्येत्यर्थः।एकं दश श
तं चैव सहस्रमयुतं तथा।लक्षं च नियुतं चैव कोटिरर्बुदमेव च।वृन्दं खर्वो निखर्वश्च शंखपद्मौ च सागरः।अन्त्यं
मध्यं परार्द्धं च दश वृद्ध्या यथाक्रममिति गणनाविद्भिर्निर्धारितत्वात्॥४१॥पंचाशद्भिर्नियुतैः पंचकोटिभिः।अयु
तानां शतैः षड्भिः षष्टिलक्षैः रथानामित्यनुवर्तते सर्वश्लोकान्॥४२॥गजवाजिसहस्राणामोघैर्वृन्दैः रथानां कोट्या
वृतः परिवारितः परिवारितनामा॥४३॥पंचाशतायुतैः पंचलक्षैः।नागद्भिः पंचाशतायुतैः॥४४॥बिडालस्याक्षिणी
इवाक्षिणी यस्य स बिडाल इति।आख्यायस्येति केचित्।तत्र बिडालस्यान इति वामनपुराणादर्शनात्।अथयेत्पानंतेषे
रथानां अयुतानां पंचाशद्भिरयुतैः पंचशतकोटिभिरित्यर्थः।परिवारितो वेष्टितः।संयुगे रणे॥४५॥अन्ये चंडमुंडरक्तबीज
प्रभृतयः।अयुतशो बहुयुताः बहुयुतैर्योद्धुमयुध्युरिति परस्मैपदं छांदसं॥४६॥कोटिकोटिसहस्रैः कोटिगुणितैः को
टिसहस्रैः परार्द्धैरित्यर्थः।ननु विंशत्यादिशब्दानां बहुत्वाभिधायित्वादेकवचनं न तेनायुतनियुतशतसहस्र
शब्देष्वयुक्तेति चेन्न।नायं विंशत्यादिशब्दवाच्यानामर्थानां संख्यान्तरेण संबंधं सत्त्वादि वचनांतत्वबहुवच
नांतत्वयोरपीष्टत्वात्।तथा चोक्तं विंशत्याद्याः सदैकत्वे विंशतीचयो विंशन इति।रथानां दंतिनां रूपाणां च वृते



31

दु.टी.

१६

कं कोटिकोटिसहस्रैर्हन्तव्यस्य ॥ ४७ ॥ तोमरैः सर्वलाभिः भिंदिपालैः हस्तप्रमाणकांडैः । शक्तिभिः शे
ल्यैः मुशलैः अयोदंडैः । परशुभिः कुठारादिभिः । पट्टिशैः खड्गविशेषैः मुशलपट्टिशौ द्वंद्वमध्यौ जौ तान व्य
मध्यांतावपि । प्रचक्रमुः उद्यमं कृतवंतः । अन्ये च कर्षे पाशैः विविधैर्हिंसितेनादि कर्मत्वं तेन पाशा व्यापि स्यात
नेपदं समवज्ञि ॥ ४९ ॥ निजानि शस्त्राणि अस्त्राणि च वर्षति न छीला ॥ ५० ॥ अनायस्तमनाव स्वमुखम
पि कृतं आननं मुखं यस्याः । आयस्तं खेदितं हिंसितं क्लेशितं कुपितं इत्यभिधानात् ॥ ५१ ॥ धुतसटः कंपि
त केशरः । वाहनं केशरी सिंहः । द्वंद्वमध्यस्ता त्वयमध्या च केशरशब्दो भिधाने पुंसि च पते केशरः केसरो
पीति द्विरूपकात् ॥ ५२ ॥ निःश्वासान् मुमुचे याः सद्यः संभूताः इत्यर्थः सद्यस्तस्मिन्नेव क्षणे ॥ ५३ ॥ ते गणाः देव्याः श
स्त्राणि भावेनोपबृंहिता अर्थात् इताः ॥ ५४ ॥ अवादयंत वादित्रवंतः । अवादयंतः कचित्पाठस्तत्र आसमं
ताद्वादयंतः संतो मुयुधुरिति पूर्वेण संबंधः । युद्धमेवमहोत्सवो वीराणां हर्षवर्धनत्वात् ॥ ५५ ॥ शक्तीनां वृष्टिभि
र्वर्षैः ॥ ५६ ॥ अपरान् आकृष्टवती । हतेभ्यो राद्दिकस्य लडि रूपं । आकर्षतेति कचित्पाठः तत्रात्मनेप
दं छांदसं ॥ ५७ ॥ गदापातविनोथितान् आमर्दितान् संतो निपातेन मुद्गिरोनरे इत्यन्वयः । अथवा गदया
पो निपातो निपातनं तेन तेन गदयेति । षष्ठ्यर्थे तृतीया गदापातनिपातेनेत्यर्थः ॥ ५८ ॥ वमुरुक्तीरंगवं

३१

१६

नः। वादित्रेपि सर्वेपि सर्वे विधयस्कंदसिद्धिकल्पेमइति न्यासाशब्दवाविन्यादिने वाम्यासलोपनिषेधो न भवति
। अथवा वर्मिरोधककारवानस्य योस्तिनस्येदं रूपं। निषेधस्कंदे तो एकविषयः। मक्षांकृठंद्रम्नात्तादिनाः
॥६९॥ ध्वनीनां पक्षिरणामनुकारिणः सहस्राः। यद्वा ध्वनाः स्वपक्षइव निनत्य भ्रमो निपततीति नयातैषिणा
र्थयोः वैस्मस्य स्यादिषु [illegible] रंतरनिपतितनसंलग्नस्मरनयाभाषपस्ताइव वक्षिनौ त्रिपतितामांति। यद्वा ध्वे
नाः शत्रुस्यमगः। ध्वेनः पत्रिलिशालेय चेन्यमिधानान्। शरैर्धनूर्लस्यान शत्रुस्य इवामगलस्यंन इत्यर्थः।
सेनानुकारिण इति पाठे सेनामनुपश्चात्कर्तुं शीलं येषां। सेनानुगन्ता इत्यर्थः। सेनानिवंनार इति केचित्। ६०।
मध्ये हृदिः। ६१। नुर्व्यां भ्रमे। ॥६२॥ पतितनाः पुनरुत्थिता इति। मानुषाणां सन्त्रेषु सत्रेषु पतिते बुद्धाउदतिष्ठ
न्कबंधानिव हन्तुं त्याय चापततामिति॥ संतिपर्वणि मरुत्सेके भित्तेकबंधोत्थानमुक्तं। अयुतसंख्या कबी
रवधे मृधादेवैकोतिवारः। कबंधो भवतीति वसिद्धिराज्ञीयते। पतिते द्राशांतिपर्वस्थः मरुत्सिराद्वोऽ
पुनार्थन पाव्या स्वेपः॥६३॥ नृत्यंतस्त्या भिन्नाः वाद्यानुनारिणः॥ कबंधाः छिन्नशिरसइति पर्यायाम्यां
तेषामतिबहुत्वमाह। छिन्नशिरसइति स्वरूपाख्यानं वा। कोवाप्युरेव बंधश्यामपोपेषां ते कबंधा इति
छिन्नशिरसां विशेषणमित्यन्ये। अथवा छिन्नशिरसोपि कबंधाः। कं शिरो वघ्नन्तीति कबंधाः। तेषां

दुर्गा० १० 34

मापावित्वान्नच्छिन्नमपि शिरो लग्नं भवतीत्यर्थः। यद्वा छिन्नशिरोवेदः। कबंधैरपि अन्येषां शिरश्छिन्न
मित्यर्थः। अथवा कबंधा असुरजातिविशेषास्तैर्हि शेषाणां छिन्नशिरस इति। अथवा कबंधजातस्यु
रस्यव छेदकं छिन्नशिरस इति विशेषणं। ऋष्टयः एकधाराः खड्गाः कृत्याः युधविशेषाः॥६४॥ देवीं त्र
तितिष्ठतिष्ठेति भाषमाणो हस्तास्केपादेव भाषमाणा इवेति ताथ्यो ज्ञेयाः। अन्यथा छिन्नशिरस्त्वात् कथं ति
ष्ठ तिष्ठेति वदिष्यति। भाषंतः। इति आत्मनेपदिनोऽपि धातोः शत्रंतः सः शतृप्रत्ययः। अथवा भाषने
इति भाषः। पचाद्यच्। भाषइवाचरंति भाषंती त्यावारार्थः क्विप्। ततः शतृप्रत्यय इति ज्ञेयं। अन्ये क
बंधेभ्य इतरं युयुधुर्नत्वनुमत्सेन अनुपपत्तेः॥६५॥ वारणाः सुरवाजिनां शोणितमेव नद्यो जलत्वेन वा
होपासु॥६६॥ वारणाः हस्तिनः। मत्तासैन्यं सैन्यसमुदायं निन्ये नीतवती॥६७॥ स र्वसिंहो मरारी
णां शरीरेभ्योऽसून्विविचिन्वति आदायसमुत्क्षिपति इव सुक्षेपायां। विचिनोती। तिवकर्तव्ये छंदोऽनुरोधे
नक्छांदसोऽकारागमः। यद्वा प्रतिशति अतिशयेन विचिनुयाद्विनोदि त्यर्थः। क्रियासमभिहारे लोट् लो
टो हि स्वौ चाथ तध्वमो रिति लोटं सर्वलकारार्थे विहितमानीय साधनीयं छांदसः परनिपातो ति
शब्दस्य। यद्वा विचिन्वतीति शतृप्रत्यया तस्य सप्तम्येकवचने रूपं। तदा सर्वसिंहे सुराणां मत्तासैन्यं

स्वपं निमेषइति पूर्वेण संबंधः। तस्मिन्नसिद्धेऽमरारीणां शरीरेभ्योऽस्त्रनञ्जारणान्निर्विचिन्वति राशि
मिव कुर्वन्ति स्मति देव्यागणेस्थ तयायुक्तं यथादिविदेवाः स्वांजुष्टुवुः परितुष्टा वभूवुः। अ
थवा एषां पुरुषशशंसुः। कर्मणि षष्ठी॥ इति भगवत्यास्त्रैकेनचित्किंचिन्नाम्ना पांटीकायां महि
षासुरसैन्यवधः समाप्तः। अथावलोकनानंतरं॥१॥ यथा मेरुगिरेः शृंगमित्यस्य मतोपमामेरुशृं
गाद्धस्तादेव मेघमंडलस्यविद्यमानत्वात्।२॥ शारीरोत्करान्। वालसमूहान्। यंतारं सारथिं। वाजि
नं रथयुक्ततुरगं हननानंतरं मारोहणार्थं सेवकैस्तपस्यापि तन्मध्यानंतरं॥३॥ छिन्नंधनुर्यस्यासौ
छिन्नधन्वा तं ष्ठासुगैः वाणैः। आजघानेत्यत्रांगकर्मत्वाभावात्। आज उपमदने इति नात्म
नेपदं समेवामे भुजे देवी मा जघानेत्यन्वयः॥६॥ तस्याभुजमित्यन्वयः। पक्षलक्ष्मशीर्षेन। जि
ष्ण्वा विशारणेऽद्भुतस्वरूपं। हेलनपनंदना। अथवा स्वपं नंदयतीति स्वपनंदनः। तस्य संबोधने हे स्वपनं
दन। पक्षालनना स्वीयां फलनिष्पत्तिं न च कारे समर्थः। फलनिष्पत्ताविनस्वरूपं॥७॥ ततः शूलं। नमिति
पाठेपि स्फलमेवतच्छेदन ग्राह्यं। स्फलशब्दस्य पुल्लिंगेपि विद्यमानत्वात्। मुसली स्फलमिति द्विलिं
गत्वात्तु अभिधाने संगृहीतत्वात्। भद्रकाल्यां भद्रकाली विषये पानेजौमिः रश्मभिर्जोहस्यमानं। अ

स्येयं हृ लनं । अंबरात् आकाशे । सप्तम्यर्थे पंचमी छांदसी । यद्वा अंबरे स्तमवस्यापरविविंबमिवेति स्प
ष्टो पंचमी । केचित्तु अंबरमनन्ती अंबरादिति अन्तस्तानेय गमने इत्यस्मात् क्विं वं तान्निष्या द्यरवि
विंबस्येव विशेषणतया योजयंति । तेजोभिर् विविंबमिति रोरीति लोपे सति दार्थं त्वंद्व लोपे पूर्वस्य दी
र्घो ऽ ण इत्यनेन ह्रस्व पाठेति अविशब्द एव रविवचनः अविर्मेषगिरोः स्यैर्य इत्यभिधानात् ॥८॥ तत
दैत्यमुक्तं स्त्रं तेन देवी मुसलेन । शतधा नीतं चूर्णी कृतं । स च मत्ता सुरचिक्षुरः शतधा नीत इत्यनु
षज्यते ॥९॥ त्रिदशान्देवान् अर्दयति पीडयतीति त्रिदशार्दनः ॥१०॥ देव्या वधाय शक्तिं मुमोचेति व
धो योजनीयात्तो शक्तिं ॥११॥ तत्स्त्रलमपि सा अंबिका ॥१२॥ समुत्पत्य आप्लुत्य गजस्य कुंभांतरे कुंभ
स्य समध्ये स्थितः ॥१३॥ नागात् गजात् महीपृथिवी पृथुधानेति संरूढ्या विशय जवगच्छ संज्ञायां समस्ता
मपि छंदोभंगभयेन नाकारस्य पृथक्त्ववलं । मस्त्वाविदित्वात् । व्रगच्छ संज्ञाऽभावाद्वा । अतिसंरब्धौ
तौ धाविशयवृक्तौ ॥१४॥ वेगात् खं आकाशमुत्पत्य यद्देव्यो परि निपत्य च मृगारिरला सिंहेन । वामस्य
शिरः पृथक्कृतं ॥१५॥ उदग्रः उदग्र संज्ञः । रणे युद्धे दंतैर्मुष्टिभिः तलैस्तलप्रहारैः । आरंपगत्वे पीतरे
तरयोगः स्पष्टं छंदसः ॥१६॥ उद्धतं उद्धतसंज्ञं । एवमग्निमानपि देवनामानि ज्ञेयानि चीरिनेत्रारिः

ञ

वस्याः सावित्रिनेत्राः परमा मायाशक्तिर्यैर्वा ते परमाः ॥ ब्रह्मादयस्तेषामपि मध्ये रानीयं त्रीविडालस्यविला 37

क्षस्य । संज्ञैकदेशे नापि संज्ञिग्रहणमिति रिति न्यायात् । उग्रो वमक्षयं वमन्दे नित्येकावुभावित्याकांक्षा

यामाह दुर्द्धरं दुर्मुखं चेति । द्वृति शक्ति पदाधिकरणन्यायेनोभशब्दो वा जनीयो ऽन्यथा वर्थः स्यात् ॥१९॥

माहिषेण महिषाकारेण । नानाविधाः स्वाः सवभावाः ॥२०॥ तुंडं मुखं तेन करणेन कपराणेन कांश्चित्तन्मस्त

ले पातयामासेत्यग्रिमेण संबंधः । खुरक्षेपैः पादाघातैः ॥२१॥ वेगेन शीघ्रगमनेन । भ्रमणेन मंडलाका

रगत्या ॥२२॥ भ्रमथा नांगूलताना मनीकं सैन्यं ॥२३॥ खुरैः क्षुण्णं संपसंमर्दितं महीतलं येन सः ॥२४॥ तस्य वेग

भ्रमणात्पांवि उक्त्यां महीष्वघमेव विशीर्यते विशीर्णा कम्पेन कल्पांत नेपदं । खंडं खंडमिति किं वावि

शेषणं यथु रयणमाः । घनाः मेघाः । श्वासानिलात्सः । श्वासवायुविक्षिप्ताः । नभसः आकाशात् । श्रुचला

पर्वताः ॥२६॥ क्रोधसमाध्मातं कोपानलेनोद्दीपितं ॥२७॥ तस्येति संबंधलक्षणा षष्ठी ॥ तस्य वंधनायेत्य

र्थः ॥ माहिषं महिष्य संबंधि । महत्महत् महासंग्रामे ॥२८॥ सद्यस्तत्क्षणमेव ॥२९॥ आशु वक्ष्यीघ्रमेव ॥

तं पुरुषं सा पवकैकैवो ऽसोभिच्छेदेत्यन्वयः । खड्गचर्मिणा सार्द्धं सहितं । पुरुषं खड्गं चर्म च विछेदेत्यर्थः

॥३०॥ करेण शुंडादंडेन । आनंदे वीवाहनत्वेन प्रसिद्धं । करेण सिंहं कर्षतो गजस्य करं निरकृंतत ति

छेदा।कर्म्मव्यतिहारे आत्मनेपदं॥३१॥वपुः शरीरं।आस्थितो गृहीतो नवान्तत्तथापूर्ववत्॥३२॥पीयत 
इतिपानं मधु॥३३॥बलं सामर्थ्यं वीर्य्यमुत्साहः ताभ्यां मदो गर्वस्तेनोद्धतोऽसंकुचितवृत्तिः॥३४॥सा
देवी।ताननधरान्।मदेनोद्धतोद्धूरीकृतो मुखरागो यस्याः सा।आकुलान्यव्यक्तान्यक्षराणि यस्मि
न्वचने तद्यथा भवति तथा वाच।समस्तं वाक्यं विशेषणं।मुखरागमावाकलितोक्षरमित्यर्थः
गर्ज्ज गर्ज्जेति संभ्रमे पुनरुक्तिः॥३६॥आक्रम्यपद्भ्या इति विशेषः॥३७॥ततः पदलेन ताडनानन्तरं प
दाक्रान्तोपि स निजमुखाद्दार्द्धमुखान्तः पदलताडनाद्देनोर्द्धनिष्क्रान्तो निःसृतार्द्धकायः एवासौ
त।तथा देव्या अर्द्धनिष्क्रान्त एव वीर्येण सामर्थ्येनाऽतिसमयेन संहृतः प्रतिबद्धः।अर्द्धनिष्क्रान्त एवासौ
देव्या वीर्येण संहृत इति क्वचित्पाठः।क्वचित्तु।ततः सोपि पदाक्रान्तस्तया निजमुखात्ततः।निष्क्रा
मन्महावीर्यः खड्गचर्म्मधरोसुरः।अर्द्धनिष्क्रान्त एवासौ देव्या वीर्येण संहृत इति पाठः।स क्व
चित्कोनिगदव्याख्यातम्॥३८॥महानिनाम महताखड्गेन।एवं च शिरश्छेदोन्वयं न ददातीत्येवं ख
ड्गधारिणमित्यादिविशेषणमसङ्गतमपरविषयः क्वचित्पूर्वमाशयः कल्पान्तरीयमिति प्रतीयते॥३९॥
एवमुक्तप्रकारेणाखर्वमितित्रैलोक्यस्थैरितिचेतिश्लोकद्वयं क्वाचित्कं॥४०॥ ततपूर्वप्रसिद्धं॥

दैत्यसैन्यं तावत्कृत्स्नं कृत्स्नं तावत्सर्वं शत्रुननाश। अवशिष्टं प्राणं पलायमानमित्यर्थः। तन्नाशपदिति
क्वचिन्यानुसारात्पदं वशिष्टं तन्नाशेति योजनीयं। सर्वं हननावशिष्टं। सर्वे योद्धारो मुक्ता इ
ति वक्तव्ये सर्वशब्दः अत्यन्तामिप्रायः। उत्कर्षं प्रौढ्येनाकापरं निरतिशयं। जग्मुर्नेशुर्वं तः॥३२॥ दि
व्यो दिवि मेवैः महर्षिभिर्नारदाद्यैः॥४३॥ इति सप्तशती टीकायां महिषासुरवधः॥ देव्यास्तु
तिं कर्तुमारेभिरे इति संबंधः। अयं श्लोकः क्षेपकः॥१॥ तस्मिन्महिषासुरादिके सैन्ये देवसैन्ये
च देव्या निहते शक्रादयः सुरगणास्तां देवीं वाग्भिः स्तुवुरित्यन्वयः। देवा इति पाठे कथं भूताः सु
रगणाः देवाः क्रीडायुक्ता इति ज्ञेयं। शीरोधरा ग्रीवा अंसाः स्कंधाः तेषां समाहारः शिरोधरां
शं अंसशब्दस्य परनिपातश्छांदसः। शिरोधरांसाशनि दस्युः सकारः। केचित्तदा अंसशब्दः
स्कंधवाचकः समासपरनिपातादि प्राग्वदेव व्याख्यायानमं शिरोधरांशं शिरोधरां संवारयन्
ते। केचित्तु अंसशब्दं ग्रीवावाचकतया व्याकुर्वंति तन्मते शिरोधरेति ग्रीवाविशेषणं। पुनः
कथं भूताः सुरगणाः उत्कर्षपुलकोद्गमेन प्रकर्षं जनितं शरीरं मोत्थानेन चारवो देहा येषां

दुर्गा०
२०

नैवरूपंपुनःकोऽकमचात्तदेवाः॥२॥ एवमादिव्याप्तंप्रत्यक्षंतत्परिदृश्यमानंजगत्॥ ब्रह्मांडेआ ४०
ननंअभिव्याप्तं। सुरगणोऽस्य ब्रह्मांडांतर्गता अतीन्द्रिया अपिपदार्थाः साक्षात्कियंतएवेति
द्वंद्वंशब्देनापि तेषां निःशेषोपयुक्तः। केनाततनभिन्नापेक्षापामादि। आत्मशक्त्या आत्मोपाधिकेनवै
भवेन। ननुनस्याः स्वाभाविकेव्यापकत्वेकथंपरिच्छिन्नत्वमतिमत्वमित्याशंक्याह निःशेषेति।
निःशेषदेवगणस्वशक्तिसमूहत्वसामर्थ्यापचयापमूर्त्तिर्देहपरिग्रहोयस्याः। तथा। यद्वा आत्म
शक्त्यानिजस्वभावेनाततंस्वं। निःशेषदेवगणस्वशक्तिसमूहत्वंतेजोंशाः चचपएवमूर्तिःशरीरंय
स्याः इत्यर्थः। भक्त्या सेव्यसेवकभावस्वीकारपुरःसरंनताःप्रणताःस्मः। स्मः इत्यर्थेपाठपुरस्कं
सा छंदोनुरोधात्। नुप्रविसर्जनंयंवास्मेतिपदं॥ अविकानोऽस्माकंशुभानिविदधातुकरोतु॥३॥ प्रभा
वंप्रकृष्टंस्वभावं अनुत्तमंनन्यसाधारणंवक्तुंसामर्थ्यंचवक्तुंनहिब्रह्मानपर्याप्तइत्यन्वयः। अस्तुभम
कस्यास्यं। भयं। भावितःस्वप्रतिसंधानजमसुखंतयोःसमाहारोऽशुभभयंतत्स्यनाशायतत्रन्वयः। वै
भाविकरूककवन्दवः। अशुभेभ्योऽटैज्यंभ्योवाभयं अशुभरूपंवाभयं॥४॥ सुकृतिनांपुरस्यवतांभव
२०

नेषु गच्छेत्सुया स्वयं स्वात्मीयापूर्वरूपापरित्यागेनालक्ष्मीः संपदित्यन्वयः। तथा पापात्मनां पापप्रवृत्तानां तत्करणा
नां भवनेष्व लक्ष्मीर्विपर्ययेत्। सत्पत्तानां नैदाद्रिरूपा वा: भगवत्याः सम्यीचीनसंपत्स्वरूपे पक्षपातो ऽसमीची
नीसंपत्स्वरूपे द्वेषो वा नास्ति उभयोः कल्पितत्वाविशेषात् तेना लक्ष्म्या रूपेण भगवत्या विवर्त्तेति नविरु
द्धेति मंतव्यं। तथा कृतधीयां वेदार्थविचाराभ्यासंस्कृतानां करणानां हृदयेषु बुद्धिः। सतः करणे श्रद्धानुष्ठितिः स्व
र्गापवर्गसाधनं ज्ञानं। तथा सतां वेदार्थानुष्ठानं तत्त्वज्ञानं श्रद्धा वेदोक्ते गुरूक्ते चार्थे विश्वासः। कुलजनस्यास्तीति
कुलजः। अर्श आदिभ्योच्। तस्या लज्जा नाम भवदुत्पत्तिंयं स्यात्तस्य चा लज्जा अकरणीयाप्रवृत्तिलक्षणेनतःक
रणधर्मः। तां त्वां नताः स्मः। हे देवि विश्वं जगत् परिपालय॥५॥ नद्वियं स्तुतिर्वक्तुं तत्त्वतस्त्वत्स्वरू
पं वर्णयितुमसमशक्यमेवेत्याह। किमितिं। वर्णयाम इति सामर्थ्यं नावां लोट् नेच्छोक्तं वर्णनसामर्थ्या
क्षेपार्थे न किं शब्दे नास्थिप्यते। तव रूपं स्वरूपं किं वर्णयाम वर्णयितुं नशक्नुम इत्यर्थः। असामर्थ्ये हेतु
माह। अचिंत्यमिति। सर्वैर्ब्रह्मसुरदेवगणादिकैश्चिंत्यमनिरूपणीयं सर्वैर्लक्ष्यत्वात्। हे देवि एतत्
प्रसिद्धं अतिवीर्यमनन्यसाधारणं सामर्थ्यं च किं वर्णयाम यतो ऽचिंत्यं सर्वेषु असुरक्षयकारि असुरक्षयक
रणशीलं। मरिशुरां हे देवि आहवेषु संग्रामेषु यानि च तत्र भवत्या चरितानि तानि किं वर्णयाम सर्वेष्व

सुरदेवगणादिकेभ्यो विज्ञापितम्॥६॥ रजःसत्त्वतमोलक्षणगुणत्रयोपाधिका त्वमेव समस्तजगतां चतुर्द
शभुवनानाम् उत्पत्तिस्थितिनाशहेतुः परीक्ष्या हेतुरिति ननु रजोगुणोपाधिको ब्रह्मा जगत उत्पादकः
सत्त्वोपाधिको हरिः पालकः तमोगुणोपाधिको हरो नाशकः इति प्रसिद्धिः तत् कथं त्वं समस्तजगतां हे
तुरिति चेत् तत्राह हरिहरादिपरित्वंन ज्ञायसे इति आदिशब्देन ब्रह्मा गृह्यते हरिहररूपं तेषां अन्यस्यापि
व्यापकत्वात्। तेऽपि त्वद्व्यापारिता जगदुत्पत्त्यादिकं कुर्वन्ति न स्वतन्त्रा इत्यभिप्रायः। ननु सर्वज्ञैर्ब्रह्मादिभिः कथं मत्त्व
रूपं न ज्ञायते इत्यत आह दोषैरिति। त्वत्कृतावृतिबन्धकानां दोषाणां रजःसत्त्वतमसां महामाया
जनितत्वमस्तीमानानां वा विद्यमानत्वात् त्वत्स्वरूपं तैर्न ज्ञायत इत्यर्थः। मत्वर्थीयाच्प्रत्ययान्तत्वेन दोषवत्त्वं
हरिहरादिविशेषणतया बोध्यते। अज्ञाने हेतुं तरमाह अपारेति। कालतो देशतो वस्तुतश्च अपारः परि
च्छेदस्तद्रहितेत्यर्थः। त्वम् आपाकल्पितत्वादपरिच्छिन्नासि। ननु ते कथमपरिच्छिन्नात्वं ज्ञायते इत्याशयः
। ननु यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादि श्रुतिः तासु
समस्तानां जगदादिरूपपरस्य ब्रह्मणः एव जगदुत्पत्त्यादिहेतुत्वं प्रतीयते तत्कथं भूतानां त्वद्विषयाच्च
जीवानामविद्यात् कल्पितत्वं हरिहरादिनामुचितम् अतो ब्रह्मविषये मेवास्तां तेषां नमत्स्वरूप

विषयमत एव न मन्मायाकल्पितत्वमपीति चेन्न त्राह। सर्वाश्रयेति। सर्वस्य प्रपंचजातस्याश्रयः उपा
दानकारणीभूतं ब्रह्मत्वमेवेत्यर्थः। ननु रूपेपि केचिदाश्रयलिंगता भवतीति न सर्वस्याश्रयः सर्वा
श्रयेति न विरुद्धं। अथवा कार्यैकारणमाश्रयणीत्याश्रयः कार्यं सर्वः प्रपंचः आश्रयः कार्यं यस्याः सा
सर्वाश्रयेत्यर्थः। ननु परिछिन्नरूपं चाश्रयभूतापाः कथमपरिछिन्नत्वमिति चेन्न त्राह। अखिलमिदं श
मृतमिति। ओं हि व्याप्य एव व्याप्तं तिष्ठतीति तथा त्वत्स्वरूपं व्याप्य पादेषु पंच स्थितं तदा त्वमपरिछिन्नत्वं स्या
त्। यत इदमखिलं जगत् ब्रह्मांडं अंशभूतं कस्मिन्न त्वदेकदेशाश्रितं अनंतब्रह्मांडान्यपि त्वदेकदेश
एव तिष्ठंतीत्यत स्त्वपरिछिन्नैवेत्याशयः। ननु विकारवत्स्वरूपं चाश्रयत्वेन मन्माभि किं विकारित्वमुच्य
ते नेत्याह अव्याकृतेति। जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यति चेति षड्विधभावविकाररहि
तेत्यर्थः। ननु कुत एतदव्याकृतिरिति अतः कारणात्त्वमाद्या प्रकृतिः। पाराद्युक्तरूपमाद्यरूपं च संपादयित्री
शक्तिरूपेण्याः साधारणा विकारिणो जगन्मूलकारणत्वरूपमाद्यप्रकृतित्वं परमत्वं च न संभवति
अत उक्तरूपा यां। तवैविकारशंकैव नास्तीत्याशयः। ननु प्रधानं जडं मूलकारणमिति सांख्या

वदंति। परमाण्वादीनां कारणतानिरासाय कादिनिरूपणेन तत्कथं जगद्धेतोः सत्यज्ञानानंदब्रह्मरू
पत्वं कथं वा तद्विषयत्वेनैव शक्रादिस्तुतिव्याख्यानमिति चेत्। अत्रोच्यते॥ सूत्रभाष्यसंस्कृतांत
करणानां शक्रादीनां मुख्यान्निर्गतास्तुतिः श्रेयो जगत्कारणविषयत्वेनैव व्याख्यातुमुचितः। श्रे
यं तु जगत्कारणं ब्रह्मैव नान्यज्जडं प्रधानादीति। बादरायणेन ईक्षतेर्नाशब्दमित्यादिना प्रति
पादितमतस्तद्विषयत्वेनैव स्तुतिव्याख्यानमिति॥ ७॥ एतदभिप्रेत्यैव वेदांतव्याख्यातृभिः शंक
राचार्यैः सौंदर्यलहर्यां ब्रह्मरूपेण भगवान्निवर्णिता॥ निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः संतो धरणिधरराजन्यतनये। त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शं
के परिहृतनिमेषास्तव दृशः॥ इति श्लोकेन। हे देवि यस्याः स्वात्मकशब्दरूपाया उन्मेषेण
समस्तासुरतानिः शेषदेवगणास्पर्शिंभवाति साक्षात्कारात्वां अनुसिमवसिावतदोः सार्वचर्ये निवमात्र
पि जगत्स्थवत्तसिं हेतुः स्वधा च त्वमेवासीमन्त्वयः। अत्रोच्यते नोत्वं जनैरुच्चार्य सा पितकम्मादि
ख्यिति शेषः। ननु हेतुः समस्त जगतामिति श्लोके सर्वजगत्कारणत्वोक्त्या सर्वोत्कृष्टत्वेन स्तुतिः
कृतानंदनंतरं स्वात्मात्मकतया स्तुतिर्निर्दोषपर्यवसायिनी स्यात्पृथिवीश्वरवोत्तमनंतरं 

प्रामेश्वरत्वोक्तिवत्। एवमुत्तरश्लोके ब्रह्मवासी इति तु विधारूपत्वेनापि स्तुतिर्विरुद्धा ब्रह्मरूपत्व
स्यपूर्वमुक्तत्वादिति चेन्न। अत्रोच्यते। स्वात्माद्यात्मकत्वोक्त्या पूर्वोक्तं सर्वात्मकत्वं दृढीक्रियते। न हि
पृथिवीश्वरस्यापि ग्रामीशेशत्वमानमस्मद्ग्रामेशस्त्वमेव मातासीत्यादिस्तुतौ। अथवा आर्थे रक्र
मेण पाठक्रमो बाध्यते अग्निहोत्रं जुहोतीत्यत्र यवागूं पचतीत्यादाविव। ते न ब्रह्मरूपपर्यवसा स्तुतिः
सर्वेति शेषाः सर्वात्मकत्वप्रतिपादनमेव चात्रार्थे प्रयोजनं॥७॥ हे देवी साक्षसि हात्तत्वमस्यादिवाक्य
जन्यब्रह्माकारांतःकरणवृत्तौ स्फुरंती विद्या त्वमसि। तत्वमस्यादिवाक्याज्जायमानांतःकरणवृत्तिर्ब्रह्म
स्वरूपावारकमज्ञानं नाशयति ब्रह्मस्वरूपं तु स्वत एव स्फुरतीति विद्या ब्रह्मस्वरूपैवोच्यतेऽस्माभिः। अत्र वरु
दी नाम विद्या निवृत्ता वेदोपयोगात् स्वरूपात्मिका वा विद्याया जन्यत्वमपि न शंकनीयं। केचित्तु ब्रह्मविषया
विद्येति वदंति तन्न अंते चैत्यात्मकत्वेन विद्याया नफलात्मकता ब्रह्मणः फलविषयत्वायोगात्। भगवत भग
शब्दवाच्य ऐश्वर्यादिषड्गुणसंपन्ना ब्रह्मविषयेति केचित् परमश्लोकेन तथा। प्रकृष्टतमत्वोपपाद
पापात्। पा मुक्तिहेतुरिति। सा विद्या मुक्तयेऽपि च वचनात्। अविविपि समनुष्ठेयं मनसा ब्रतं साधनं यस्याः सा

गथा॥ मलाघ्नमाह भगवानृषतं जल्हिः। अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहा इति। हि शब्दो हेतौ
॥यस्माद्विद्यासि अतस्त्वं मुनिभिर्मननशीलैरभ्यस्यसे मुमुक्षुभिः नियतानि वशीकृतानीन्द्रियाणि येस्ते
सुनियतेन्द्रियाः तत्त्वं ब्रह्मैव सारो येषां ते तत्त्वसाराः सुनियतेन्द्रियाश्च ते तत्त्वसाराश्चेति विग्र
हः। अस्ताः ध्वस्ताः समस्ता दोषा रागादयो येषां तैः॥८॥ शब्दात्मिका शब्दब्रह्मस्वरूपा॥ ऋक् ऋ
ग्वेदः। यजुर्विषयुर्वेदाः। ऋचामभिप्रायं बहुवचनं। यजुर्वेदस्य षडशीतिशाखात्मकत्वात् सुवि
मलानि निर्दोषाणि च तानि ऋग्यजूंषि चेति विग्रहः। तेषां साम्नां च निधानमाश्रय इत्यन्वयः
साम्नामपि बहुवचनं शाखाभिप्रायं सहस्रशाखात्मकत्वात् सामवेदस्य। निधानशब्दोऽजहल्लिं
गत्वेन न स्त्रीलिंगता। उद्गीथमुच्चैर्गानं तेन रम्याः पदानां पाठो विद्यते येषु सामसु तानि रम्यपाठ
वन्ति। तेषां। उद्गीथेति पाठे तु उद्गीथः साम्नां विशेषस्तेन रम्याणां पदानां पाठो विद्यते येषु।
साम्न उद्गीथो रस इति श्रुतेः। अथ वा उद्गीथः प्रणवः। उद्गीथः प्रणवो मन्त्रः सर्वव्यापीनि
रंजन इति नैगमाभिधानात्। तेन रम्यपदपाठवन्ति निःसर्वेषामेव विशेषणं। वृत्तिः प्रण २३

वंकुर्यादृग्यदावंतेचसर्वदा।अवस्यंनोकृतंपूर्वंपरस्ताच्चविशीर्यतीतिमनुः।इत्थंत्रयीवेदत्रय
स्वरूपात्वं।अथर्वणस्कःशांतिपौष्टिकजपैर्नेयेवांनमीवान्ष्यपूर्णाभिधानेदेवइतिसर्वान्वदेन्नि
तिहन्तुपदेशेनभवबन्धनीतिदेवी।भगवतीवीर्यातिशयशालिनीसर्वप्राणिभ्योवलीयस्त्वात्।।भवः
संसारस्तस्यभावनापानुवर्तिनापर्वात्नीकृष्यादिलक्षणा।कृषिर्देशिज्पानदश्चवर्तनीयापस्तुपालनंवि
द्यावेनापस्तुपालनेनमस्तभगवार्त्तावत्तिस्वयाभवेयेतिवित्तपुरुषेवार्त्तायाः कृष्यादिरूपत्वसुतेः।परमा
र्त्तिंहंतीपीडातिशयनाशिनी।भवभावनायसंसारजातार्थंत्रयीवेदत्वपित्मत्वपः अन्यआद्भवभाव
नायसंसारस्थितयेत्रयीत्वंयोजोपदेशात्।तथाचाहुः।अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते।आ
दित्याज्जायतेवृष्टिःवृष्टेरन्नंततःप्रजाइति।।२।।मेधासिसरस्वतीरूपात्वमेवासि।अथवामेधावधारणश
क्तिः।यथावेदादिरूपःशब्दग्रामोहृदिस्थिरीक्रियतेविदितोऽखिलशास्त्राणांसारस्तत्वंरहस्यंवायया।।
दुर्गादुर्ज्ञेया।दुर्गैदुःखच्छेदोयोभवःसंसारस्तद्रूपःसागरःसमुद्रःतत्रनौरिवनौःपारगतिसाधनं।
असंगाअप्रतिहतगतिश्चरणाअद्वितीयावा।सोक्तकैरगाधारत्वादेकपुत्रात्वंनुतदद्दितापितारसि।
श्रीर्लक्ष्मीः।कैटभारेर्हरेर्हृदयेएकया।अद्वितीययाकृतोऽधिवासःस्थितिर्यया।अथवाकैटभारे

दुर्गा० हृदयेऽस्मिन् कृतनोऽधिकसौपमा भासि त्वं । शशिमौलेः करेणावनतिप्राप्तसंपदा । श
२४ शिमौले हरस्य कृता प्रतिष्ठानुकूलौ पवेनिवासो गौरात्वमेव ॥ २२ ॥ ईषद्धासेन सत्त्वं नेदीप्तमस
संनेत्रकोवर्णो विपर्ययः । द्विसन्धानं यथा भवति तथापि लोकेऽति किंचिद्विशेषणं वा । हासेन सहितेन स
हासं परिपूर्णं च ॥ ४ द्रविं वमनुकरोतीति तथा तं परिपूर्णं वेद्रविं वानुकारि । आह्लादकारित्वात् । कन
कोत्तमं स्वन्तुल्यं कांचनं तस्य कांतिरिव कांतिर्यस्या । कः । कादम्बुत्तमा कांतिर्यस्येति वा । अत एव कांतम
नोहरं । कनकोत्तमकांतिवत् । कांतिमित्येकं वा पदं । एतेन देव्याः स्निग्धगौरांगत्वं सूचितं । तथात्य
द्भुतमपि तेव वक्त्रं विलोक्य पन्महिषासुरेण च हृतं आश्चर्यजनकं ते मुखं विलोक्य तथापि तामस स्व
भावादविचारेण च हतमितियोजना । अविचारेण च हारकरलोकेऽत्र गर्भविशेषणं आत्तरुषेति ।
प्राप्तक्रोधेनेत्यर्थः । आत्तरुषेति विदुषपुस्तके पाठस्तत्रापि स एवार्थः । क्रोधांधा हि प्रकारयोग्यं च
हारायोग्यं वेति किमपि न विचारयंतीत्यतः प्राप्तरूपा महिषासुरेणात्यद्भुतं मुखं विलोक्या
पि तथापूर्वोक्तरूपेण च हतमिति वा तथा शब्दो योजनीयः स एवासौ वलेन ॥ १२ ॥ हे देवि कुपितं २४
ते मुखं दृष्ट्वा सद्य शशांकसदृशं न महिषः प्राणान्प्रत्युमोच तदतीव चित्रमात्मप्रयं । कुपाम

लकौटिल्येन करालं भीषणं । उद्यच्छशांकसदृशछविरोषारुणं । हि यस्मात्कुपितस्यांतकस्य
यमस्य दर्शनेन केजीव्यंते जीवंतिनु शब्दः अपितु नकेपीत्यर्थः ॥१३॥ प्रसीद प्रसादं त्वं कुरु । परमा
त्वत्कृष्टस्वानुग्रहासती भवती भवाय उद्भवसंपदे भवतीत्यर्थः । यदा भवाय भावनाय संसारविमू
क्तिजननाय भवती परमोत्कृष्टा । प्रसादपरमेति पाठे प्रसादेनपरमावती भवायास्थितेत्यकस्य
ते । कोपवती कुलानि गत्वा नाशयसि । एतदधुनैव ज्ञातं । यदेतन्महिषासुरस्य सुविपुलं बलं
सैन्यं प्रसंतनीतं विनाशं प्रापितं । त्वत्कोपेनाकस्य स्वदैत्यसैन्यस्य नष्टत्वादिदानीं कोपाख्यस्याने
स्वगत्वात् । नाशयसि अतः कोपं परित्यज्य प्रसन्नाभवेत्यभिप्रायः ॥१४॥ सदाभ्युदयदा भवती येषां
प्रसन्ना ते पुरुषाः जनपदेषु संमताः संमाननाजः स्वग्रामादौ संमता इति किमात्रव्येमित्यर्थः । च
अपरं तेषां धर्मवर्गो न सीदति अवसादं न समंते । धर्मशब्दो धर्मार्थकाममोक्षरूपपुरुषा
र्थः । चतुष्टयोपलक्षणं । धन्याश्लाघ्याः निभृताः विनीताः आत्मजभृत्यदाराः पुत्रसेवकस्त्रियो ये
षां ते । सदा जनपदे संमता इत्यादिवा सदाशब्दान्वयः ॥१५॥ हे देवि सुकृती अत्यादृतः अतिश्रद्धा
वान् सदैव धर्म्याणि धर्मादनपेतानि सकलानि कर्माणि करोति भवत्याः प्रसादात् भवत्याः ।

स्तुवन्ताम्॥ तत् कर्म्मणो हेतोः स्वर्गं ब्रह्मलोकादि लक्षणं प्राप्नोति। चकारान्मोक्षं च लभते न
नुमोदेवि तेन कारणेन लोकत्रयेपि इह स्वर्गे मोक्षेपि फलप्रदात्वमिति योजना। भवती प्रसादादि 50
त्यत्र छेदो नुरोधान्न पुंवद्भावः। भवतीमिति भिन्नं वा पदं प्रसादात् प्रसन्नतया न नुमोदेवि तेन हेतुना
भवति लोकत्रयेपि फलदे त्वन्वयः। तत्र इहहि कं फलं सत्कर्म्माचरणं स्वर्गादि सुखानुभवः। मोक्षिकं नि
त्यानन्दोद्भवं। लोकद्वय इति पाठे इहलोके परलोके चेत्यर्थः॥१९॥ दुर्गे संकटप्रदेशे स्मृता सती अ
शेषजन्तोर्भीतिं भयं हरसि। दुर्गे इति संबोधनं वा स्वस्थैः स्थिरान्तःकरणैः पुरुषैः स्मृता सती अ
तीव शुभां मतिं मोक्षादिसाधनभूतां बुद्धिं ददासि। दारिद्र्यं निर्धनता दुःखं प्रतिकूलवेदनीयं भयमना
गत प्रतिकूलप्रतिसंधानजं एतत् त्रितयं हरति तच्छीला दारिद्र्यदुःखभयहारिणी तत्संबोधने हे दारिद्र
दुःखभयहारिणि सर्वोपकारकरणाय सर्वेषां नुपकारसंपादनाय सदा सर्वेषु कालेषु आर्द्रचित्ता स्निग्ध
चित्ता त्वदन्या का न कापीत्यर्थः। देहस्तामपि स्मरणेन त्वयोपकार एव संपाद्यते। स्मरणेन मुक्तिं स्वर्गं वा लभे
ते परः॥२०॥ ननु दुष्टविनाशकशीलत्वात् दुष्टानां मोक्षादि प्रमाणाभावाच्च सर्वोपकारकारित्वं क
थमित्याशंक्य समाधत्ते एभिरिति एभिरसुरैर्हतैः सद्भिः जगत्सुखमुपैति प्राप्नोति। पापकृत्यादिभ

भस्म तीपा। एतेन खलु नैष्ठिकत्वर्थः। तथा एतेऽसुराश्चिरायचिरकालं नरकार्थं पापं। प्रतिकूलं कुर्वं
तु नाम नाम मस्यादेऽस्युपगम्यो अथवा आमशब्दो अभ्युपगमवाचीन कारो निषेधार्थः। अथवा आ 51
मशब्देन नरकविशेषवाची आमसंज्ञकं नरकाय पापं न कुर्वन्त्वित्यर्थः। संग्राममृत्युमधिग
म्य यदि वै पापं तु तिमत्वा अहितान्नरिपून्नविनिहंसात्यत्वपः।२१। भवता हब्बे च वि लोकेय व
सर्वान्सुरान्भस्म किं न करोषि अपि तु करोष्येव। हृष्टे चेतिपाठे दर्शनेनैव चेत्यर्थः। एवं
सति अरिपुवतश्शस्त्रं प्रहितरोषि व्यापाद्यसि तत्। द्विपदोपि हि यस्मात् शस्त्रपूतांल्लोकान् इन्द्रा
दि लोकान् प्रपान्तु इत्थं रावेषप्रकारा साध्वी परोपकारनिरता मतिस्ते अहितेष्वपि तव भवति। एवम
सपातकिनोपि रसेदमाः सकृतिं लमंते भवतित्वे अपि तेऽति साध्वीति पाठे अपि शब्द तव शब्दा
ध्याहारं विनैव योजनाते अरिष्वपि तेनवाति साध्वी मतिर्भवतीत्यर्थः।२०। अथाजवपः खड्ग
स्वस्यप्रभानिकरो दीप्तिसमूहः साया विस्फुरणैः सर्वतः प्रसरणैः तथा तेनैव प्रकारेण लोगे
भैयानकैः भवलाग्रास्य भल्लस्य छस्य कांतिनिवहेन दीप्तिसमुदायेन वा सुराणां दृश अन्न
हूं यद्विविलयं विनाशं यन्नागतानि तदेतेदाखर्यमिति शेषः। अथवा हस्यो विलयं नागतानि

ततस्तच्च विनाशमाप्नोति॥ एतत्तत्त्वज्ञानविनोदकं कारणमितिभावः। कथं भूतमत्ता नन्नमंभ्रमन्दीप्तिम 52
ता। दुःखदुःखदायोनि अखिलं दैत्यान्विन्निनाति तत्त्वज्ञस्य चंद्रकिरणास्पर्के वसात्हृयो नन्दष्ट इति फलिता
र्थः॥२०॥ हे देवि दुष्टेत्यनेनेशमनं दुर्जनेन वैष्णवरूपं नं न वशीलं चरितं। तथा एतत्तन्नपरिहरण्यमा
नं तत्स्वरूपं सौंदर्यं। अविचिंत्यं वक्तुमशक्यं अन्यैः। सहाय्यत्वं नवतीर्थं च हृतो देवानां पराक्रमो
पैस्तेषामसुराणां हृतनाशकं। हृत देवपराक्रमाणामितिकर्मधारयषष्ठी। इत्थं अनेन प्रवीरे
षावमापारणात्स्वर्गे नप्यनरूपेण प्रकारेणावैरिष्वपि दयैव त्वया प्रकटिता। अथ वा इत्थं एवं
सत्यपि दयाशब्देन नन्नलक्षणे तिष्ठ्यात्मे वंशाशब्देन ह्ता। पापिनोऽपि यतः पूर्वं ते उक्तं च। द्वावेव
पुरुषौ लोके सूर्यमंडलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति।२१॥ हे देवि ते तवा
स्य पराक्रमस्य केनान्येनोपमा भवतु न केनापीत्यर्थः। शत्रुभयकारि रात्रूणां भयकारणशीलं
अति हारि अति मनोहारि तव रूपं च कुत्रान्यत्रापि किंतु भुवनत्रयेऽपि त्वय्येवेत्यन्वयः। हे वरदे वां
छित प्रदे देवि ते कृपा संग्रामनिष्ठुरता च भुवनत्रयेऽपि त्वय्येव दृष्टा नान्यत्रेत्यर्थः।२२। एवमिदं खिलं
समग्रं त्रैलोक्यं रिपूणामसुराणां नाशनेन त्वया त्रातं पालितं। रणे अस्माकं रिपुगणा अपि रणमू
२६

ईदृनसं यामप्रधानेस्यानेकत्वादिवंनिता: स्वर्गापवर्गिता: कृत्स्नवप:। अद्रिको मनोहरंकारो धेवांसु
रारीरणां तेभ्यो भवं जातं भयमथास्माकमपास्तं स्नपनीतं ऽप्रत सेनुभ्यं नमः। नमस्कारान्निरिक्त
प्रत्युपकारकरणे नास्माकं सामर्थ्यमिति भावः॥२३॥ चापज्यानिःस्वनेन धनुर्विविधमाना
याप्रत्यंचातस्याः स्वेरण प्रपादि॥२४॥ दक्षिणोदक्षिणगामोगो भ्यामरणे नेत्यत्र। संज्ञापूर्वकवि
धेरनित्यत्वान्न वृद्धत्वाभावः। पथ्यासतैः राक्षमयानामात्मस्नात्सेकामितेः पदैमिति। एतेपीदृक्षा
मिपदैकके न खमितिवाम्न्न स्पाडनन्तरस्यामित्यत्र छंदोनुरोधात्संधाभावः।२५॥ सोम्यानिःस्थि
स्थितिव्यापाराणि। अत्यंतमतिशयेन घोराणि संहारकारणानि। तात्पर्यघोराणीति कवित्याठः।२६॥
तत्रार्थः संहाररूपप्रयोजनवशात्घोराणि मयानकानि ते रस्माद्रक्षमुवं पृथिवीं च रक्ष॥२६॥
आदिशब्देन धनुष्मकशरादीनां ग्रहणं। करपल्लवैः संगः संसर्गो विद्यते एषां तानि। तैरस्मा
न्सर्वतः। सर्वेभ्यो भयेभ्यः सर्वप्रकारेण वा रक्षेत्यर्थः॥२७॥ मंद्रेनोमन्दवेदैर्वोधानजातैः गंधैः
म्रारम्यादिभिः। अनुलेपनैः श्रीखंडादिभिः॥२८॥ नकेवलमर्चिता धूपिता च यदि क्रोधमनोहरै
धूपैः। सर्वसुरप्रधानत्वान्। स्तुतिः शाके लैव हेकं नाम्रमेषु रात्ता नावनुमंतारः अन्त सेवामौप

54

वारिकं स्तनितकर्तृत्वमादाय सुरैरिति बहुवचनं ॥ अन्यथा त्वेकसुरमुखात् एकारशब्दनिर्गमो न
स्यात् अत्र तु नकोपि तादृक्प्रसंगः । इदं च स्यादिशब्दस्यार्थत्र नीतिर्न स्यात् । गुरुकीर्तनरूपावान्त
रातिर्नोस अनुसारोपरूपा । अर्चनादिकं तु सर्वैकृतं कं विरोधाभावात् । यदि च सर्वैरेव
स्तुतिः कृतेत्याग्रहः । तर्हि इत्यादेर्व्याधेकवचनप्रयोगो स्मत्कृतः सुरगणस्य समूहरूपरोजे
पः ॥ २९ ॥ हे सर्वैविदन्याः । अस्मत्तः अस्मत्सकाशात् भवद्भिरभिवांछितं नाविषतां अति
वीप्सा प्रीत्यतिशयेन अतिदातेति तात्पर्यः । ३० ॥ अपरं च अन्यत् भवतां कर्तव्यं तद् कुरुं वन्त्
गच्छनिवेधतां । अयं पद्यलोकः कश्चित्कः । ३१ । यत्क नैवं न तत्वपासवैं कृतंपत् यस्मादयं
त्वयानिरुतः एतावतैव वात्वयास वैंकृतं ॥ ३२ ॥ अस्माकमिति । चतुर्थ्यर्थे षष्ठी । अथवा
नः अस्मभ्यं यदि वरो देयस्तर्हि अस्माकं परमापदो हिंसेयात् इत्यन्वयः । हिंसेयात् इति हि
सि धातुरुक्तदादिगणोपि पठ्यते तत आत्मनेपदमिति केचित् । रुधादिगणस्यास्य परस्मै
पदित्वात् । हिंस्यात् इति स्यात् । कथंचिदात्मनेपदानपनेपि हिंसीयात् इति स्यात् । केचि
त्तु अदादिगणस्थस्य हिंसेयात् इति वदंति तन्न तु छं आदि प्रभृति म्कः सापदइतिशयोचुकि

कृ मे विधिर्लिङ् आत्मनेपदमध्यमपुरुषैकवचने हिंसीष्ठाः इत्येव स्यान्नहिंसेथा इति हिंसे
था इत्यपि क्वचित्पाठः। सिंसेरिति च न तत्र आत्मनेपदं विधौ लिङ्। पृषोदरादित्वात्रिग चोनो
प। हिंसेथाः इति केचित्। सिंसेहिंसि संबोधनं था इत्यर्थे इति वा॥३३॥ च अपरं वा मर्त्यो
मरणे धर्मो मनुष्यस्य स्थितिः पूर्वीकैर्लैबैपचचवोविमवपेभ्वयं मैः कृत्वा धनदारादि संपादं ह
ष्ये भवेथाः वित्तादिसिद्धेर्नाशीनां हानिर्भवन्ति। अर्थैरर्था निबध्यन्ते गजैरिव महाग
जाः। इति न्यायात्॥३४॥ इति उक्तप्रकारेण। जगतः अस्मन्नश्वार्थे। मद्रं कल्याणं करो
ति अथवा कल्याणं वर्द्धयतीति मद्रकारी। अन्तर्हितो अदृश्यो भव॥३५॥ हे भूपदे
पृथिवीपते। संभृता आविर्भूतानां नूत्यन्नेति भ्रमितव्यं। पूर्वं पतितपादितं सर्वात्मत्व
विरोधात्॥३६॥ इति हासान्तरं स्तुवपति पुनरिति। गौरी देहे वा तनोः शरीरे आसन्न
मासोऽवस्थितिर्यस्याः सा गौरीदेहा गृहीतं गौरीशरीरे त्वयि धे। अथवा गौर्याः देहः श
रीरं कोषरूपं देहो देहकोरः वस्याः सा गौरीदेहा। शाकपार्थिवादित्वान्मध्यमपदलो
पी समासः। अथवा गुरोर्महादेवात् समुद्भूता गौरी शेषे सवदेहो यस्याः सा रादितमास

त्स्यादेवी गच्छतो तदेवास्तुतीयध्यानसमुक्ता अभवात् तत्र शुम्भे त्यपिमेरणान्वयः। देवमहेशेन 56
माहात्म्यवधायेति। दुष्टदैत्यानां धूम्रलोचनादीनां। शुभ शुंभ शुभ प्रहरणा इति धात्वनुसारेण
तालव्यसकारं वै नौ शुंभनिशुंभशब्दौ। शुंभनिशुंभमर्दिनी मधुकैटभासुरघातिनी सोमिनि
द्रां भगवती मधुकैटभनाशिनी मितितै नेत्रिरीपद् कृत्यमिरोधादं त्यसकारं वं तवित्यर्थे।।२७।।
तत्र शुंभप्रभावाख्या नमितो स्तुतिको वाच्यार्थः। ते शुभम्पद्याव त्कथ्यतामित्यपरः।।२८।। इति
टीकायां शकादि स्तुतिः।। इदानीं देव्या माहात्म्यं तैरमावि रूप्या सुरनैर्न्तराध्याय प्रस्तवितं
मिति शान्तान्तरमवतारयन् ऋषिरुवाचेति। पुरा शुम्भनिशुम्भादनुजाभ्यां। तथा च वामनपुराणे।
तस्याः पुत्रत्रयं जज्ञे सप्ताख्याश्व बलाधिकं।। ज्येष्ठः शुंभ इति ख्यातो निशुंभ स्थावरो सुरः। तृ
तीयो नमुचिर्नाम महाबलपराक्रमः। इति स वीर्यतेरिन्द्रस्य मदो गर्वः बलं शक्ति स्तयोरा
त्रयात्।।२।। सूर्यस्य भावः सूर्यत्वः। सूर्याधिकारमित्यर्थः। ऐन्द्रं वं इन्दुसंबंधी नमित रविसक्ष
णमधिकारं अथवा याम्याधिकारं वरुणस्य चाधिकारमित्यन्वयः। चक्राते कृतवन्तौ।।२।।
पवनर्द्धिवायोरधिकारं ततोनंतरं देवी संस्मरंतीत्यन्वयः। पराजिताः समरे अथोतो। २८

त्तिस्तोज न्मयौवननाशकृन्न लक्ष्म्या तादृशा अवस्थ्ये येषां देवानां ते त्रिदशाः संस्मरंति स्मर
णवंतः॥ चिरातीतोप्य ऽर्थो जेषु वृते मानेन पाज्ञाप्यते॥४॥ कथं संस्मरंतीत्याकांक्षायामा
हृतयेति। वस्तस्य स्वरूपमाह। यथेति। आपत्सु सत्तां हृंतं लक्ष्मणा भवतामखिलाः परमा
पदो नाशयिष्यामित्यन्वयः॥५॥ तत्र त्रिमवति। विष्णुमायां विविधपरिच्छेदरहितां मा
यामित्यर्थः। भक्तिमन्नताभिसर्पलक्षणाः प्रकर्षः प्रशब्देन द्योत्यते स्तनोहः। देव्यौ येतन
शीलायै। मरुतो ब्रह्मादीनपि देवपतिस्वर्गादिभिर्व्यवहारयतीति मत्ता देवी तस्यै इत्यर्थः।
।भद्रमखिलं ज्ञानं मंगलरक्षणं करोतीति भद्रा स्थितिशक्तिस्तस्यै। अथवा भद्रं कैवल्या
ख्यं। तद्योगात्तदा। नाद्यमद्वानियता भिन्न अखिलधानमाज्ञोनियमपुक्ताः संतो वा। स्मेति
पादपूरणे। स्म इत्यर्थे वा। तां जगद्धेतुत्वेन प्रसिद्धां प्रणताः स्म इत्यर्थः॥७॥ रुद्रस्येदं रौ
द्रं दारुणं परिणामकर्कशं संहृतिरूपं कर्म स्यास्तीति रौद्रा अर्श आदिभ्योऽच् अच्प्र
त्ययादौ ङीति स्यात्। तस्यै संहृतिशक्त्यै इत्यर्थः। नित्यायै कालानवच्छिन्नायै गौरवर्णायै। धा
त्र्यै जगत्पोषिकायै जगद्धारणशीलायै वा। नमो नम इति भक्त्यतिशयेऽवीप्सा ज्योत्स्ना

यैपूर्णचंद्रमंडलमरीचिरूपायै। इंदुरूपिण्यै ज्यो॥ त्स्नास्वरूपचंद्रमंडलरूपधारिण्यै। अतएव 58
सुखायै सुखदायिन्यै परमानंदमय्यै वा। कल्याण्यै कल्याणकारिण्यै कल्याणगुणयुक्तायै वा।
।वृध्यै उपचयकारिण्यै। सिध्यै अणिमादिरूपायै। कूर्म्यै कूर्म्मरूपिण्यै। कूर्म्मपदस्थाने कूर्म्म
इति क्विपा पदं कचित्तिष्ठति तत्र प्रणताः संतो नमो नमः। कूर्म्म इत्यत्र पः। अत्र कल्याण्यै प्र
णताः स्मः। वृध्यै कूर्म्मै नमो नम इति जोजना। अयमेव पाठः। समीचीन इति प्रतिभाति। अत्र
पाठ उपपदविभक्तेः। कारकविभक्तिर्बलीयसीति न्यायेन कल्याण्यादिशब्देभ्यो द्वितीयेवा॥
स्यात्तन्नमः। स्वस्तिस्वाहेत्यादिना चतुर्थी। नैरित्यै असुरशक्त्यै निरृते नैरित्यै नैरितीत्यत्र वि
पदे निरितिपदस्यासुरोपलक्षणत्वात्। केचित्तु नि। ऋतिपदं लक्ष्मीवाचकं ततः स्वार्थे
अण्। लक्ष्मीरूपायै इत्यर्थः। भूभृतां पृथिवीधराणां मेर्वादिपर्वतानां वा लक्ष्म्यै श्रियै। स
र्वाण्यै शिवधर्म्मिण्यै। इन्द्रवरुणभव शर्वेत्यादिना ऽऽनुगागमो। सर्वस्य स्त्री सर्वाणी
त्यर्थः। ते नु नमः॥८॥ दुर्गायै दुरधिगम्यायै गम्यधीनां ज्ञानार्थत्वात्॥ दुर्गा संकटे पारयति
पालयतीति दुर्गा। पारः परिच्छेदो स्याः देशकालः लाघववविच्छिन्नात्वादितिवा। दुर्गा संसार २९

सर्वकारिण्यै सर्वं जनयते स्वतंत्रायै। सर्वकरणसाक्षीणायै वा सर्वकारिण्यै इति पादः कश्चित्सं
बोधनरूपः। तत्र हे सर्वकारिणि दुर्गादिरूपायै। तुभ्यं शमने नेनमः। इति योजनीयं स्यादिति
ये याथ्यी तु मध्यतिः पञ्चकृतिपुरुषविवेकज्ञानं वा तद्रूपायै। कृष्णायै कृष्णवर्णायै॥ धूम्रायै
धूम्रवर्णायै॥१२०॥ अतिसौम्यं ब्रह्मविद्यारूपं संसारतापोच्छेदहेतुः अतिरौद्रं संसा
रहेतुभूतमविद्यात्मकं च रूपं यस्याः सा अतिसौम्यातिरौद्रा तस्यै। नताः सन्तो दमेन
मो नमः कुर्म इत्यध्याहारः। नता इति पदस्थाने नमः इति पदं कश्चिद्दृश्यते। जगत्प्र
तिष्ठायै जगदधिष्ठानरूपायै। देव्यै देवशक्त्यै नमस्कारतपोयागादिक्रियारूपायै॥१२॥
सर्वभूतेषु सर्वप्राणिषु या विष्णुमायाशब्दिता विद्याविद्ययोरपि मोहनरूपे
ति केचित्। इति शब्दः स्वरूपप्रदर्शनार्थः शब्दिता सर्वागमेषु प्रतिपादिता। तस्यै नमो न
म इत्यन्वयः। विष्णुमायादि सात्विकराजसतामसशान्तपाञ्चिधाधिमिधत इति तत्प
रामर्षकं तस्यै पदं त्रिरभ्यस्यते। नमः पदं तु प्रसादने समर्थमेवा पुनः पुनरुच्यते ने
न न दोषः। उक्तं च। विषादे विस्मये हर्षे खेदे दैन्येऽवधारणे। प्रसादने संभ्रमेपि द्वि

स्त्रिरूकं नंदुष्यतीति अथ वाचि: ब्रह्मणे नमस्कृत्य नमिमिति त्रिनमस्कारः। कायिकवाचिकमा 60

नसिकनमस्कारत्रयप्रदर्शनाय वाग्वर्जितं रूपं पि: विष्णुमायायाने न नानो बुद्धिरिन्द्रियं प्रधान

ग्या। शक्तिभ्यं स्लाप च ह्रां तिजानीन ततः परे:। लज्जाशांतिस्तिततः श्रद्धा कांतिर्नस्ति ततः परा। हृति

स्तानो द्युतिर्सेया स्त्वं तितत्वदयापरा। तुष्टिपुष्टि ततः स्थानं मायत्वं नीन ततः क्रमात्। क्रमो पंक

थिनो स्वामि: संप्रदायानुसारतः। अनार्षत्वाद्वितो न क. प्रपेक्ष्यो बुद्धिमत्तरैः। धृतिपुष्टि

त्वनार्षं इति केचिद्वदंति तदतिमंदं सर्व संप्रदायिकपुस्तके प्यपिठि ते नपावि धमानत्वात्

वे तनाऽत्र ततः करसल दृश्नी ॥१३॥ बुद्धिरंतःकरणं। सदसद्विचारचातुरी वा ॥१४॥ निद्रानिरिन्द्रियप्र

देशे मनोलयः। सर्वेन्द्रियाणां विश्रामरूपः। भुक्तपीतान्नपरिपाकशक्तिरिति केचित् ॥१५॥ पार्थि

वधातुस्वपतोऽवसादः। अन्यवकारकारणं वा क्षुधा ॥१६॥ छाया शोभा कांतिर्द्युतिशब्दविरित्य

भिधानात्॥ आतपाभावरूपेत्यन्ये ॥१७॥ शक्तिः सामर्थ्यमुत्साहो वा शिवस्यात्मस्वरूपा शक्तिर्वा

१८॥ तृष्णा अप्राप्तीपवस्तु स्वीकारेच्छा ॥१९॥ क्षांतिः शक्तौ शत्याम यिप रहितापकारसहनं।

॥२०॥ जातिः जगदुत्पादनं॥ अनेके पुष्पपिंडेष्वेकाकारव्यवहारसाधनं ब्राह्मणत्वादिसामान्यं

म्बं वा। जातिश्छंदसि सामान्ये मालत्यां गोत्रजन्मस्वित्यभिधानात्॥२१॥ लज्जा लोकव्यवहारपाल 61
पत्री स्वकार्यनिमित्तमन्यतः संकोचो वा। अकरणीयान्निवृत्तिर्वा स्वकार्ये विषया प्रज्ञानाम्नी वा
॥२२॥ शांतिरंतरिन्द्रियनिग्रहः॥२३॥ श्रद्धा गुरुवेदवाक्येषु विश्वासः॥२४॥ सकलजनेषु
साधारणानुकंपा वा। आदिरूपनिरतिशयभावना बुद्धिर्वा। तथा च देवलः। सामुख्यात्प्राप्तिसं
प्रीतिरर्थिनां दर्शने दया सत्कृतिश्चानुसूया च सा श्रद्धा परिकीर्तिता॥२४॥ कांतिः कमनी
यता प्रतिपादपत्री। कुसुमशरपूरितशोभा वा। तदुक्तं। शोभैव कुसुमशरेण पूरिता कांति
रुच्यते। कांतिमेवातिविस्तीर्णां दीप्तिमित्युक्तिस्तरय इति॥२५॥ लक्ष्मीः धनादिसंपत्पुरुषपु
रुषप्रणविनी वा॥२६॥ वृत्तिर्जीविका प्रवृत्तिर्वा॥२७॥ धृतिः विपत्तावप्यदैन्यता॥२८॥ स्मृतिर
नुभवव्यतिरिक्तं ज्ञानं॥२९॥ दया सर्वसत्त्वानुकंपा। परदुःखपरिहारे निरूपाधिकेच्छा वा॥३०॥
तुष्टिरनधिगतानभिलाषः। समस्तवस्तुष्वनाकांक्षा वा॥३१॥ पुष्टिः पुरुषार्थसाधनसा
मर्थ्यं॥३२॥ माता देवाधिदात्री। बालत्वादिवशाभिमननी देवता जननी वा॥३३॥ भ्रांतिः
अतस्मिंस्तदिति प्रत्ययः॥३४॥ अखिलेषु समस्तेषु भूतेषु प्राणिषु। इंद्रियाणां वा सारिणां

पादपायूपस्थाख्यानां कर्मेन्द्रियाणां घ्राणरसनचक्षुःश्रोत्रत्वगाख्यानां ज्ञानेन्द्रियाणां चाधि
ष्ठात्री एवं वृत्तिः निवृत्तिःकारणं मतस्या। व्याप्त्यै देव्यै विभवैकस्वभावायै त्रिविधपरिच्छेदशू
न्यायै ब्रह्मस्वरूपायै ब्रह्मशक्तये इत्यर्थः। व्याप्तिदेव्यै इति पदे समस्तपदस्य गतः त्वा स्फूर्तिश्च चैतन्य
संबंधव्यतिरेकेण न संभवतीति चैतन्यव्याप्तिः। सर्वैरंगीकार्या। अन्वयचैतन्यसंबंधाभावेन
सत्तास्फूर्त्योरभावात् शशविषाणतुल्यता स्यादिति भावः॥ ३६॥ सुरैर्दैवैः पूर्वं महिषासुरकाले
अभीष्टसंश्रयात्। अभिमतलाभाद्येः। अभीष्टसंश्रयेति। पाठे देवीविशेषणं दिनेषु पूर्वकालेषु
वृत्तिदिवं वा। नोऽस्माकं शुभानि मंगलानि। भद्राणि मुक्तिसुखानि। शुभानि भद्राणि निरतिश
यकल्याणानि वा। भद्रशब्देनोत्कृष्टवचनः। यथा भद्रं भद्रं वितरभगवन्भूयसे मंगलायेति
॥३७॥ सांप्रतं चेदानीमपि या ईश्वरी उद्धतैर्दैत्यैः तापितैरस्माभिः सुरैर्नमस्यते पूज्यते
। भक्त्या विनम्राः मूर्त्तिर्येषां तैः। नमस्यते इति नमोवरिवश्चित्रङः सा जितिक्षजं नात्कर्मणि
लट्॥ ३८॥ एवमुक्त्वा इति स्तवादियुक्तानां देवानां सर्वाभियुक्तानामिति क्वचित्पाठः तत्र स
मीपप्रदेशे। अवयवास्नानार्थ्यै पृष्ठे। देवेषु स्तवादियुक्तेषु सत्सु तत्र पार्वती जाह्नव्याः गंगाया ३१

स्तोपेस्तानुमस्यापवावित्यन्वयः। अथवाऽनावेरणकादेवाननाहन्यामि सुरवंगतेत्यर्थः। अ
नाहतस्तस्तानुंवा गतेनेत्यर्थः। एवं स्तांगां गांशंभोर्जेस्त मयो मूर्तिः सर्वे सुरपूजेतिवदंति॥७९॥
शोभनेसुवैवस्याः सातान्सुरान् अत्रप्रदेशे भवद्भिः का स्तूयते इत्यब्रवीत्। अपृच्छत्। तान्स्याः
सुरान्पृच्छंत्याः शरीरकोशात् अत्रभवद्भिस्तूयमानोऽहमपिविज्ञानमयानंदमयात्मकमयकोशा
त्। तान्वयशकारपाठे शरीरावरणकं। चुकादित्वे के शरीरावयवसमुदायादित्यर्थः॥८०॥
समस्तैर्मिलितैः समेतैरिति वा पाठः॥८१॥ यत्तस्याः शरीरकोशान्निः। सृता ततस्तस्मात्
कौशिकीत्येवंरूपेण लोकेषु गीयत इत्यन्वयः॥ शाकीतितालव्यशकारः सन्दंत्यसकार
वतः। कोषशब्दात्। कोषमवाकौशिकीति प्रत्ययादिनेत्यादेर्वा दुसादित्वात्तु कौति॥८२॥ सापूर्व
त्यपिकृष्णाभूत्॥८३॥ परंजितं रूपं सौंदर्यं विभ्राणां धारयंतीं मे विकां कौशिकीं चंडो मुंड
श्च ददर्श॥८४॥ कर्मणस्यापममभिप्रैतिसत्संप्रदानमित्यत्र क्रियाग्रहणं कर्तव्यमित्युक्तं तेन
क्रियया यमभिप्रैति तस्यापि संप्रदानसंज्ञत्वात् श्लाघेत्। संप्रदाने चतुर्थी आख्यातक्रियया

पमभिप्रेतेति तस्यापि संप्रदानसंज्ञत्वात् । शुंभायेति संप्रदाने च तुर्थी व्याख्याता तक्रियया प्याप्यमा
णत्वात् । भासयंती द्वीपवंती ॥ ५७ ॥ नाहमुत्तमं रत्नं किंचिदपि केनचिद पिनद्धं । एवश
ब्देवधारणेन हृदयमेवेत्यर्थः । अपिशब्दस्यार्थः ॥ ५६ ॥ स्त्रीरत्नमुत्तमा स्त्री अजहल्लिंगत्वा
त् । नपुंसकं चाह । अत्रेति रमणी प्रमंगं यस्याः सा त्विवक्षी स्या ॥ ५७ ॥ रत्नानि स्वजातिश्रेष्ठानि
पक्षुद्रं स्वजातौ तु तद्रत्नमभिधीयते । मरणपोवजाह्नवः । गजाश्वमादौ वेभंतानि वस्तानि
।भांति शोभंते । सांप्रतमेतानि तेन रत्ने इति । कस्विन्याठस्तत्र तत्र व्याख्याता रंविनेव पो जनाधर
त्नमुत्वेख्यापयन्नाह । ऐरावतइति । गजरत्नमुत्तम गजः समानीतः । अर्थानत्ववापारिजात
नामानतरुः पारिजाततरुरिति मध्यमपदलोपी समासः ॥ ५८ ॥ विमानं व्योमयानं हंसंसंयुक्तं
हंसैरूह्यमानं पद्मसोत्रल लोरानमनमासीत एतत्ते स्वर्गस्य इत्यानीतं सत् त्रिष्ठति । ता
हृश्यविमानस्याभ्यादरे रत्ना स्थित्वा समरूढैः परमकाष्ठापन्नत्वं स्वच्यते । कथंभतं विमानं । अ
द्भुतं । अत्र चापस्मात्तत्र वरत्नात्रित्तस्ये वं वेधसो विमानादमिरुनीतमित्येतद द्भुतमाश्चर्यं

॥५०॥ मन्त्रपमन्त्रा मानिधिः । नाम्ना । किंजल्किनी अत्र स्वच्छलनकेसरा मुक्ताफलकेशरपुञ्जो वा
॥ ददौ अर्थानुकंपा । सर्वैर्देवान्स्नानादिषु पंकजानि यस्याः ॥५१॥ स्वंदनं वरो रथमुख्यः । प्रजापते
र्लक्षणः । दक्षसैन्यन्ये ॥५२॥ उत्क्रांतिमरणं ददाति मुत्क्रांतिदा । उत्क्रांतो मरणकाले प्रतिरवं
उपनीतिवा । हेईशान वस्त्रानुः परिग्रहे स्वीकारे परिग्रहणे ते नेति परियश्चोद्दस्सतत्त्ववातिष्ठ
तीति शेषः ॥५३॥ अब्धौ समुद्रे जातानुत्पन्नाः निमुंमस्वना व्यसेत्यर्थः । वाससी परिधानवाव
रणवस्त्रे । अग्निरेव शौचो चं नैर्मल्यकारणं ययोः । अन्ये अग्निना वा शौचोपवित्रं ययोरिति वा ।
अग्निरिव शोचं मिति वा । अग्निः क्षिप्तेन निर्मले भवनतः इत्येते वने त्यर्थः ॥५४॥ ते त्वया । षष्ठीचतु
र्थ्योर्हि तीपाश्चयोरिति व्युत्क्रमेणादेशविधानात्त्वतीयावामपि क्वचिदादेशः । नतीयापाउ
त्ति । रूपकमवधेयं वा ॥५५॥ देव्या इति चतुर्थ्यर्थे षष्ठी । देव्याः समीपे । वा ॥५६॥ साअर्घ्यादेवी
इति च सर्वं चंडमुंडवचनं ॥ इति ईहशश्च वंचा । कार्यं का कारणीयं । लघुशीघ्रं आनिष्व
वा यथा स्यात् ॥५७॥ स सुग्रीवः । शैलेहिशैलस्योत्कृष्टदेशे अतिशोभन उत्तिमनोहरे पञ्चसा
आसे तत्र गत्वा सादनं तरं तां देवी स्वलक्ष्यं मनुत्कं बं मनोहरं वाचयथा स्यात्तथामधुरया

मघा गिरा प्राह।५९। त्रैलोक्यस्य परमेश्वरस्य। त्वत्सकाशं मां प्रेषितः सन् दूतः। स्थाने त्वत्सकाश 66
मागत इति काकाक्षिवत् त्वत्सकाशपदमुभयत्र योज्यं।६०॥ तत्रादृतो ऽस्मि तावत्स्य देवयोनिषु
विद्याधरादिषु निर्जिताः अखिला दैत्यारयो देवा येन तस्य तस्य आकर्णय॥६०॥ कि मादृशाका
रायामाहृमेत्यादि। वशाः स्वाधीनास्तेन। अनुगमनात् छायानुविधायिनो वा। वशगा अनुगामि
नि वा। स्वामिसमीपे न स्थापयामि। पृथक् पृथक् इंद्रादिभेदेन। ऐन्द्रादिरूपाश्च॥६१॥ अश्वोत्तमः
अश्वोत्तमानि। गजरत्नानि नानादिग्देशावस्थितानि ममेवाश्रयानीत्यनुपश्यते। हत्वेत्यादि। अपि मे
रावणो जनीयं तथैव गजरत्नं च हृतं देवेन्द्रवाहनमिति कचित् पाठः। तत्र गजरत्नमैरावताख्यं
मपाहृतमित्यर्थः॥६२॥ उच्चैःश्रवसश्च देवाश्च कोऽस्मात् कीर्तिमत्वयोपाधृत्यपेनोच्चैःश्रवस
शब्दमकारान्तं आकरस्येहि दिवौकसैरिति हरिवंशस्यादिवौकसशब्दवत् व्युत्पाद्य संज्ञाश
बेन बहुव्रीहीकुर्वित्तिनन्दं मत्वयोपात्तयत्ययेनैव बहुव्रीहिस्थलत्वात्। तस्मात् प्र
कोदरादित्वात् छांदसत्वाद्वा अकारान्तता। अश्वरत्नं देवेन्द्रवाहनं हृत्वा देवेन्द्रात् चोरपि
त्वा आत्मनो रक्षार्थममरैः इलितपत्य मन समर्पितमित्यन्वयः॥६३॥ रत्नभूतानि वस्तूनि 33

पानि तानि मध्येवमद्भतानि ज्ञानानि स्थितानि। वाशोभने देहे॥९४॥ अस्मदोहपो मे त्वेति केस्मि
न्नपि मंतुमेव वयमिति बहुवचनं। अन्यानसुरनारीस्त्येनवा॥ उपागछ मामप॥९५॥ गुरुवि
क्रमां विक्रमतिशायमाजं भज मामप। वंचलो वचल स्वभावो अपांगो नेत्रप्रांतो यस्याः वेप्रसि
द्धे॥९६॥ प्रासमसे इति नित्यं परस्मैपदित्वात्॥ घष्घघ्य संगतेन यावत्त भीवित त्वपर्ष्यत्वात्कर्म्म
ण्यात्मनेपदं। मया त्वमेव त्वपेंजापञ्जनन्यासीत्यर्थः। यत्परि ग्रहणात्। मदाप्त्रयणात्। नहु ह्यास्वं
तः करणेन समालो क्यविचार्य समालोच्येति कचित्पाठः। मम परिग्रह नो मम पत्नी त्वं॥९७॥
गंभीरं अंतः अभ्यंतरे स्मिन मीयद्धास्य यस्याः जंगेवाच। भगवती अचिंत्यमाहात्म्या। विशेष
णत्रयमत्यंतोत्कर्ष प्रतिपादनाय॥९८॥ अत्रस्थाने गुणवर्णनेवा। मिथ्याकिंचिन्नोदितयेने
नसत्यतापादाध्यंप्रतिपाद्यते। किंत्विति वाक्यं नरा रंभे। अत्रस्थाने॥ परि ग्रहे वाय स्वतिज्ञा
तं संकल्पितं नतरं। मिथ्याकथं क्रियते अपितुनक्रियत इत्यर्थः। अल्पबुद्धित्वादिति परिस
तोक्तिः॥९९॥ कासा प्रतिज्ञेत्यपेक्षायामाह। योमामिति। संग्रामव्यतिरिक्ते न प्रकारेण जयति
अभिभवति। संग्रामे दर्प्पं वदबलवदभिमानं विपोदति शमयति। प्रतिवलः समानसामर्थ्यः

68

पूर्वपूर्वाभावे भवती निभावः ॥७१॥ ततस्तस्मात् । अत्रैव मे भद्राय गच्छतु । पारिंगच्छातु विवादं क
रोतु ॥ किं चिरेण विलंबेनालं । अमुमनोजेव यास्याम् ॥७२॥ अत्र वदित्तागर्वितासितला वा ॥७३॥
एकिकाएकाकिनी । कुत्सायां वाचार्थे वाकः ॥७४॥ संयुगे संग्रामे ॥७५॥ केशाकर्षणेन निर्वृतं
गोरवं वस्त्राः । मामनि व्यति अपितु गमिष्यसे वा ॥७६॥ एवमेतत् इति तुपकासोक्तिः । वनपस्मात्
॥८०॥ अत्र हतः सपत्नैः । मम मम पायष्ठहुसं एततस्तर्वे ममपुरे ऽव्यापा चस्तु कथयस्व वयवपुन्के तक्क
रोतु इत्यन्वयः ॥८१॥ इति शत्रुसजीवककथायां व्याख्यातः ॥ अथ मध्ये पृष्टितः । कोपयामास । समा
चष्टस्यपितन कान्त्या । देत्यानामधिपं सेनानाथं ॥२॥ दुष्टा दुःशीलां । केशाकर्षणविकृतो । अत्र
कुत्सी कृतो ॥३॥ तस्याः परित्राणं इदानि एवं मनो यदि कश्चिदपरः उत्तिष्ठते समीपे तो ऽदो
तुच्छकर्मणस्मीत्यात्मनेपदं ॥४॥ अमुरागं सह तत्राणं यच्छा हता । इत्यन्वयः । इति तं सख्य
रं ॥५॥ तु हिता वलोकिमा चलः । मूलं समीपं । मूलमाप्तं ति कम्मेवे विविनामशासन
त ॥६॥ चेत् यदि । अद्य इदानीमेव । भवतीम द्वीरं च उपे व्यति । ततः एकोदं वनात्स
वामि ॥७॥ वनवान् सामर्थ्यवान् ॥ वलसंवृतः सेनापरिवृतः विशेषणद्वयं सोपस्त   ३४

सां किं करोमि किमपि कर्तुं न शक्नोमि ॥ ८ ॥ आसं विकाहुंकारेणोद्धतं भस्म चकारेत्यन्वयः ।
भस्मसादिति पाठे भस्मस्वरूपमित्यर्थः ॥ ९ ॥ मकासेनं सेनासमूहाधिपः कलिशावकैः शरैः श 69
क्तिभिः । परस्वधैः कुठारैश्च कम्पनैः मनो देवी ववर्ष । क्वचिद् इदं विकेति च य मां न पाठः ॥ १० ॥ धुन
त्पटः कंपितकेसरः । पपान प्राविशत् ॥ वाद्यते इति वाद्धनः ॥ वकुलोत्के कर्म्मणि खुट्टा स्वः
मन स्मलाधारणे निक्वचित्पाठः । तन्नाधरकापेनपा स्मा कांति सपा जघानेत्यर्थः ॥ १२ ॥ कौ
शक्तिहृदयमध्यानि । तदुक्तं । कोष्ठं कुक्षौ कुमूलेच मंदिरावपवेनि जे इति ॥ केशरी सिंहः
तत्प्रकारेण चपेटप्रकारेण ततो विसृतांगुलिः करः ॥ १३ ॥ कोष्ठादिति त्यजन्नोपं पंच
मी । उदरं विदार्य रुधिरं पीतवान् ॥ १४ ॥ महाहनुनामकेन स्वादेन ॥ १५ ॥ देव्यानिर्त्त तंदे
व्याः सिंहेन समस्तसैन्यं क्षपितं वभूत्वा क्षपितमिति ॥ तारकादिन्वादितञ्च । स्वयवाक्षपं
करोतीत्यर्थे णिच् ततो निष्ठा ॥ १६ ॥ नोपूर्वो क्नौ ॥ १७ ॥ गच्छतेति छंदोनुरोधादनुस्वार
लोपः । व्यस्य पादादित्वेऽपवदवतु ववनं ॥ गोरव प्रतिपादनापधृत्येकं वा ॥ इतरासुरसाहित्ये
नवा ॥ गच्छन्तमिति वा पाठः ॥ १८ ॥ केनप्रकारेण तेन व्येत्याकांक्षायामाह केशेष्विति । के

शाकशीर्ग्गं हत्वा बध्वा वा समानीयतामिति शाकेन नसंबंधः। वः इति बहुवचनं पूर्ववद्व्याख्येयं॥
वामित्तिद्दापाठः। यदि वः युष्माकं युधि संशयः विजये श्रायोजे तुंनशक्येति संशयस्तदा क्रमशो 70
ऽस्त्रक्षेपादिपुरुकर्म्मपरित्यज्य अशेषैः समस्तै रायुधैः॥ सर्वैरस्त्रैरंमिलित्वा विनिहन्यतां ता
यतां। १ल्तस्यां हतायां ताडितायां सत्यां यदि साम्नेनास्याति॥ तदातं गृहीत्वा शीघ्रमागम्यतां यदि
सनानस्या तां तदातं बध्वा गृहीत्वा शीघ्रमागम्यतामित्यन्वयः। अथ वा समानीयतामित्यादिना
बंधनपूर्वकमानयनमुक्तं पद्गीत्यादिनाशीघ्रमागम्यतामित्यं तेन हननपक्ष उक्तस्तया: कः
स्येयानित्याकांक्षायां पूर्वोक्तो बंधनपूर्वकानयन। पक्ष एव श्रेयानिति निर्द्धारयितुमाह वध्वा
गृहीतानाताभिति अथवा हनुधातुरत्र गत्यर्थः। तथा च शेषा युधवत्तारवयतात्र हतावान्तमो
गतायां तस्यां तां गृहीत्वा वध्वा शीघ्रमागम्यतामित्यर्थः। अस्मिन्पक्षे वध्वा समानीयतामि
त्युक्ते पुरुमध्ये कथं सा वंधनीयेति यदि वः संशयस्तदा शेषैरित्यादिना बंधनोपयोगि हन
नं बंधनोपाय नयोपदिश्यतेन चाल्वविपोगपयंवस्यातिमंतव्यं। अथ यदि वः संशय इत्ये
वमयशब्दो योजनीयः। केचित्तु बंधनपूर्वकानयने संदेहवतां हननमुपदिष्टं तन्नाप्य ३५

सामर्थ्ये पुनर्वध्यानवनेपक्षांतरे वाच्यथशब्दप्रयोगाद्दुष्यतेइतिवदंति।तन्मंदं वधनासामर्थ्ये
येषांहननमुपदिष्टं तेषांहननेप्यसमर्थानांहननात्कद्दिमवधनोपदेशस्यव्यर्थत्वात्॥२०॥
इतिसमस्तटीकायांधूम्रलोचनवधःषष्ठोध्यायः। चंडमुंडौपुरोगमौयेषां॥१॥शैलेन्द्रस्यहिमा
चलस्यशृंगेसिंहस्योपरिव्यवस्थितामित्यन्वयः। कांचनस्यसुवर्णस्येदंकांचनं।तस्मिन्नविका
रार्थेतुनित्यंवृद्धशरादिभ्यइतिमयडेवस्यात्।नारम॥२॥तेदृष्ट्वातांसमादातुंग्रहीतु
मुद्यमंचक्रुः।उद्यताःउत्साहिनः।गृहीतुंतस्याःसमीपेगच्छंति॥३॥उच्चैरत्यर्थं।कोपेनललाटां
तर्हितकालीप्रतिबिंबाद्राहेव्याःवदनंमषीवर्णंकृष्णवर्णंतस्मिन्कालेऽभूत्।मषीकज्जलवि
कृतिः तस्याःवर्णइववर्णोयस्यतत्तथा।सप्तम्युपमानपूर्वस्योत्तरपदलोपश्चेतिसमासः।उ
पमानपूर्वपदस्यैकदेशेपत्रोपमानशब्देवर्त्तेनेनतत्रैवसमासः।तेनोपमेयस्यवर्णशब्दस्य
लोपोनभवति।अथवामषीशब्दोत्रगुंजावाचकस्तद्वद्रक्तंमुखंयस्यास्तदाभूदित्यर्थः॥४॥
ललाटःललाटफलकात्भालपरिसरात्।कालीकृष्णवर्णाकरालंअतिभीषणंवदनंयस्याः।क

तलोमीवक्त्रा। हस्तौ असिपाशौ विधेते यस्याः सा तथा। भ्रुकुटीकुटिलांतस्येति पाठे। भ्रुकुट्या कुटि 72
लो नृः पांतो यस्य वदनस्य तस्य ललाटफलकात् ललाटफलकमभिव्याप्य द्रुतं शीघ्रं वि
निष्क्रान्ता विनिर्गतेति योज्यं। ५। खट्वांगं खट्वापादः ईशा। नरस्यावयवे मुंडे वर्त्तते। नरमुंड
मालाविभूषणं यस्याः। नरैर्द्रुतमुद्गीतं खड्ग मुद्गरं तो निवासम नपरा लाद्दर्शनात्॥ द्वीपी चित्रव्याघ्रः।
तस्य चर्मपरिधानं यस्याः सा द्वीपिचर्मपरिधाना। उपसर्गास्य घञ्यमनुष्ये वहुलमिति वहुल
ग्रहणात्तस्य घुपिदीर्घः।

दंतैः रेव वंती केशेष्वेकं सा जगादेति संवंधः। क्वचित् वर्वं पत्यति भैरवमिति पाठः। तत्र वक्रे
निक्षिप्य दर्शनैर्भ्वर्वयंतीत्येति संवंधः। वर्तमाननिर्देशस्तु समस्तं वक्ष्यमाणस्य अधिगंतव्यः। चर्वितव ३६

तो। अचर्वयदितिवा। चर्वयतिइतिपाठस्तु सुखा इतिभाति॥१०॥ अपरं च ग्रीवायां कंठे जग्राह

। वररग घातेनान्यमाक्रम्यवक्षस्यान्यमपोथयत्। आलोडितवती। पोथयद्धिंसायां॥११॥ यो

धं तु रगैरित्यत्रयोधमिमित्येकवचनं जात्यभिप्रायेण। केचित्तु। तथैवयोधांस्तुरगैरथान्सार

थिभिः सह। निक्षिप्यवक्त्रे दशनैश्चर्वयन्त्यतिभैरवं॥ एकानजग्राह केशेषु ग्रीवायामथचा

परान्। पादेनाक्रम्यचैवान्यानुरसान्यानपोथयदिति बहुवचनांतः पाठः। केचित्कः कस्यि

न इव भाति। शस्त्राणि शरादीनि। महास्त्राणि समंत्राण्यस्त्राणि ब्रह्मास्त्रादीनि मुखेन कृत्वा ग्रासा

पयमं जग्राह देवी। पश्चात्कर्तृभूतेन यारूपा क्रोधेनकरणभूतेन दंतैर्मथितानि॥१२॥ म

मर्द्दनिपिवेषः॥१३॥ दंताग्रामिदतास्त्रविनाशंजग्मुः॥ क्षणेन अल्पेन कालेन। अभिदुद्राव अभि

मुखं प्रययौ॥१५॥ क्षिप्रैः प्रक्षिप्तैश्चक्रैर्मुंडसंज्ञो छादयामास तत्वपुः। केचित्तु मुंडक्षिप्तैरित्येकं पदं

तत्र मुंडनाम्ना असुरेण क्षिप्तैश्छादयामास अर्थात् मुंडः। अथवा मुंडद्वाराक्षिप्तैश्चंडश्छा

दयामासेत्यर्थः। सहस्रशो इतिसंख्यैः कवचनीभिर्वीक्ष्यावाभिर्निविशसा॥१६॥ तैः त्याः दैत्याः मुखं

विशमानानिप्रविशमानानि संतिवभुः सुसुभिरे घनोदरं मेघाभ्यंतरं रवेः कृता रविविंवानी

घनोद्रेकः कदाचवेशः कदापि न जान इति कारस्कादमस्तोपमेयं॥१७॥ भीमं भवं करं यथा स्यान्न
यातिरूपाति क्रोधेन जस्ताना मैरवं भवानकं न हि तुं शीलं स्याः स्मा। करालं वदनं तस्या ने
मध्ये ये दुर्दर्शाः दशनाः तैरुद्वृत्ता त्र्यंतशब्दस्य मध्यवाचित्वमत्रार्थात्तु च्यते। अंधकारनिक
